प्रोर्ध्वाधः क्रमाल्लग्नं स्फुटं यत्सूर्य राश्यंशसमानकोष्ठे घट्या दिकं स्वेष्टघटीयुतं तत् तत्तुल्य घट्यादि भवेद्धियत्र तत्तिर्यगूर्ध्वांकमितं हि लग्नं स्वेष्टघट्यादियुक्तं तत्स्पष्ट घट्यादिकोनितं षष्टिघ्नं विभजेत्याह कलाद्यंतरतः स्फुटं॥ **अथ दशमोपयोगिनतं॥** पूर्वनतं स्याद्दिनरात्रिखंडं दिवानिशोरिष्टघटी विहीनं दिवानिशो रिष्टघटीषु शुद्धं द्युरात्रिखंडं त्वपरं नतं स्यात् दिन रात्र्यर्ध दिनरात्रीष्टेनहीनं पूर्वनतं दिनरात्रीष्टं दिनरात्र्यर्धोनमपरनतं भवति तत्रलग्नइव रविराश्यंशकोष्टानामंकेषु नत घटिका संयोज्य क्रमात्पूर्वोक्तादेव लग्नं दशमं भवति तच्च कदाचित् चतुर्थगांयाति॥ **अथेतरभावानां साधनं॥** लग्नोनतुर्यतः षष्टांशयुक्त लग्नस्तनोः संधिस्ततः धनभावस्ततो धनभावसंधिस्ततस्तृतीय भावस्ततस्तृतीय भावसंधिः पुनः षष्टांशं एकोनितं चतुर्थे योज्य सुखसंधिस्ततः पंचमभावस्ततः पंचमसंधिस्ततः षष्ठ भावस्ततः षष्ठभावसंधिः पुनरेकैकं भावसंध्योर्योज्य सर्वे १२ सिद्धा भविष्यंति

॥दशम सारिणी॥

०	मे.	वृ.	मि.	क.	सिं.	क.	तू.	वृ.	ध.	म.	कुं.	मी.	०
०	३ ५ २०	७ ५७ २०	१३ १२ २०	१८ ३५ २०	२३ ४२ २०	२८ २७ २०	३३ ५ २०	३७ ५७ २०	४३ १२ २०	४८ ३५ २०	५३ ४२ २०	५८ २७ २०	०
१	३ १४ ३६	८ ७ १८	१३ २३ ६	१८ ४६ ६	२३ ५२ १८	२८ ३६ ३६	३३ १४ ३६	३८ ७ १८	४३ २३ ६	४८ ४६ ६	५३ ५२ १८	५८ ३६ ३६	१
२	३ २३ ५२	८ १७ १६	१३ ३३ ५२	१८ ५६ ५२	२४ २ १६	२८ ४५ ५२	३३ २३ ५२	३८ १७ १६	४३ ३३ ५२	४८ ५६ ५२	५४ २ १६	५८ ४५ ५२	२
३	३ ३३ ८	८ २७ १४	१३ ४४ ३८	१९ ७ ३८	२४ १२ १४	२८ ५५ ८	३३ ३३ ८	३८ २७ १४	४३ ४४ ३८	४९ ७ ३८	५४ १२ १४	५८ ५५ ८	३
४	३ ४२ २४	८ ३७ १२	१३ ५५ २४	१९ १८ २४	२४ २२ १२	२९ ४ २४	३३ ४२ २४	३८ ३७ १२	४३ ५५ २४	४९ १८ २४	५४ २२ १२	५९ ४ २४	४
५	३ ५१ ४०	८ ४७ १०	१४ ६ १०	१९ २९ १०	२४ ३२ १०	२९ १३ ४०	३३ ५१ ४०	३८ ४७ १०	४४ ६ १०	४९ २९ १०	५४ ३२ १०	५९ १३ ४०	५
६	४ ० ५६	८ ५७ ८	१४ १६ ५६	१९ ३९ ५६	२४ ४२ ८	२९ २२ ५६	३४ ० ५६	३८ ५७ ८	४४ १६ ५६	४९ ३९ ५६	५४ ४२ ८	५९ २२ ५६	६
७	४ १० १२	९ ७ ६	१४ २७ ४२	१९ ५० ४२	२४ ५२ ६	२९ ३२ २२	३४ १० १२	३९ ७ ६	४४ २७ ४२	४९ ५० ४२	५४ ५२ ६	५९ ३२ २२	७
८	४ १९ २८	९ १७ ४	१४ ३८ २८	२० १ २४	२५ २ ४	२९ ४१ २८	३४ १९ २८	३९ १७ ४	४४ ३८ २८	५० १ २८	५५ २ ४	५९ ४१ २८	८
९	४ २८ ४४	९ २७ २	१४ ४९ १४	२० १२ १४	२५ १२ २	२९ ५० ४४	३४ २८ ४४	३९ २७ २	४४ ४९ १४	५० १२ १४	५५ १२ २	५९ ५० ४४	९
१०	४ ३८ ०	९ ३७ ०	१५ ० ०	२० २३ ०	२५ २२ ०	३० ० ०	३४ ३८ ०	३९ ३७ ०	४५ ० ०	५० २३ ०	५५ २२ ०	० ० ०	१०
११	४ ४७ ५८	९ ४६ ४७	१५ १० ४६	२० ३२ ५८	२५ ३१ १६	३० ९ १६	३४ ४७ ५८	३९ ४७ ४६	४५ १० ४६	५० ३२ ५८	५५ ३१ १६	० ९ १६	११
१२	४ ५७ ५६	९ ५८ ३२	१५ २१ ३२	२० ४६ ५६	२५ ४० ३२	३० १८ ३२	३४ ५७ ५६	३९ ५८ ३२	४५ २१ ३२	५० ४२ ५६	५५ ४० ३२	० १८ ३२	१२
१३	५ ७ ५४	१० ९ १८	१५ ३२ १८	२० ५२ ५४	२५ ४९ ४८	३० २७ ४८	३५ ७ ५४	४० ९ १८	४५ ३२ १८	५० ५२ ५४	५५ ४९ ४८	० २७ ४८	१३
१४	५ १७ ५२	१० २० ४	१५ ४३ ४	२१ २ ५२	२५ ५९ ४	३० ३७ ४	३५ १७ ५२	४० २० ४	४५ ४३ ४	५१ २ ५२	५५ ५९ ४	० ३७ ४	१४
१५	५ २७ ५०	१० ३० ५०	१५ ५३ ५०	२१ १२ ५०	२६ ८ २०	३० ४६ २०	३५ २७ ५०	४० ३० ५०	४५ ५३ ५०	५१ १२ ५०	५६ ८ २०	० ४६ २०	१५
०	मे.	वृ.	मि.	क.	सिं.	क.	तू.	वृ.	ध.	म.	कुं.	मी.	०

दशमसारिणी.

०	मे.	वृ.	मि.	क.	सिं.	क.	तू.	वृ.	ध.	म.	कुं.	मी.	०
१६	५ ३७ ४८	१० ४१ ३६	१६ ४ ३६	२१ २२ ४८	२६ १७ ३६	३० ५५ ३६	३५ ३७ ४८	४० ४१ ३६	४६ ४ ३६	५१ २२ ४८	५६ १७ ३६	० ५५ ३६	१६
१७	५ ४७ ४६	१० ५२ २२	१६ १५ २२	२१ ३२ ४६	२६ २६ ५२	३१ ४ ५२	३५ ४७ ४६	४० ५२ ५२	४६ १५ २२	५१ ३२ ४६	५६ २६ ५२	१ ४ ५२	१७
१८	५ ५७ ४४	११ ३ ८	१६ २६ ८	२१ ४२ ४४	२६ ३६ ८	३१ १४ ८	३५ ५७ ४४	४१ ३ ८	४६ २६ ८	५१ ४२ ४४	५६ ३६ ८	१ १४ ८	१८
१९	६ ७ ४२	११ १३ ५४	१६ ३६ ५४	२१ ५२ ४२	२६ ४५ २४	३१ २३ २४	३६ ७ ४२	४१ १३ ५४	४६ ३६ ५४	५१ ५२ ४२	५६ ४५ २४	१ २३ २४	१९
२०	६ १७ ४०	११ २४ ४०	१६ ४७ ४०	२२ २ ४०	२६ ५४ ४०	३१ ३२ ४०	३६ १७ ४०	४१ २४ ४०	४६ ४७ ४०	५२ २ ४०	५६ ५४ ४०	१ ३२ ४०	२०
२१	६ २७ ३८	११ ३५ २६	१६ ५८ २६	२२ १२ ३८	२७ ३ ५६	३१ ४१ ५६	३६ २७ ३८	४१ ३५ २६	४६ ५८ २६	२२ १२ ३८	५७ ३ ५६	१ ४१ ५६	२१
२२	६ ३७ ३६	११ ४६ १२	१७ ९ १२	२२ २२ ३६	२७ १३ १२	३१ ५१ १२	३६ ३७ ३६	४१ ४६ १२	४७ ९ १२	५२ २२ ३६	५७ १३ १२	१ ५१ ५२	२२
२३	६ ४७ ३४	११ ५६ ५८	१७ १९ ५८	२२ ३२ ३४	२७ २२ २८	३२ ० २८	३६ ४७ ३४	४१ ५६ ५८	४७ १९ ५८	५२ ३२ ३४	५७ २२ २८	२ ० २८	२३
२४	६ ५७ ३२	१२ ७ ४४	१७ ३० ४४	२२ ४२ ३२	२७ ३१ ४४	३२ ९ ४४	३६ ५७ ३२	४२ ७ ४४	४७ ३० ४४	५२ ४२ ३२	५७ ३१ ४४	२ ९ ४४	२४
२५	७ ७ ३०	१२ १८ ३०	१७ ४१ ३०	२२ ५२ ३०	२७ ४१ ०	३२ १९ ०	३७ ७ ३०	४२ १८ ३०	४७ ४५ ३०	५२ ५२ ३०	५७ ४१ ०	२ १९ ०	२५
२६	७ १७ २८	१२ २९ २६	१७ ५२ २६	२३ २ २८	२७ ५० २६	३२ २८ २६	३७ १७ २८	४२ २९ २६	४७ ५२ २६	५३ २ २८	५७ ५० २६	२ २८ २६	२६
२७	७ २७ २६	१२ ४० २	१८ ३ २	२३ १२ २६	२७ ५९ ३२	३२ ३७ ३२	३७ २७ २६	४२ ४० २	४८ ३ २	५३ १२ २६	५७ ५९ ३२	२ ३७ ३२	२७
२८	७ ३७ २४	१२ ५० ४८	१८ १३ ४८	२३ २२ २४	२८ ८ ४८	३२ ४६ ४८	३७ ३७ २४	४२ ५० ४८	४८ १३ ४८	५३ २२ २४	५८ ८ ४८	२ ४६ ४८	२८
२९	७ ४७ २२	१३ १ ३४	१८ २४ ३४	२३ ३२ २२	२८ १८ ४	३२ ५६ ४	३७ ४७ २२	४३ १ ३४	४८ २४ ३४	५३ ३२ २२	५८ १८ ०४	२ ५६ ४	२९
०	मे.	वृ.	मि.	क.	सिं.	क.	तू.	वृ.	ध.	म.	कुं.	मी.	०

तथा चानया परिपाट्या भावान्निर्माय लग्नं सप्तवर्गशुद्धं चेन्महोत्तमं लग्नं भावसमेषु ग्रहेषु फलं पूर्णं संधिसमेषु फलाभावः व्यासः सप्तवर्गं च षड्वर्गं पंचवर्गं शुभावहं चतुर्वर्गं च संग्राह्यं त्रिवर्गं हानिकृद्भवेत् वसिष्ठः इष्टैश्च चेष्टादिबलोपपन्नैश्चतुर्भिरप्यंबरगैर्विलग्नं अनिष्टषड्वर्गमपीष्टमाहुः स्वेशेक्षिते गौतम गालवाद्याः अथात्रोक्ता अपिस्मृत्यर्थमेकविंशतिदोषाः कुपंचांगभवः १ संक्रांतिः २ सग्रहोविधुः ३ कर्तरी ४ षष्ठमृतिलग्नचंद्रः ५ त्रैविध्यंगंडांतं ६ कुषड्वर्गः ७ भृगूरिपुगः ८ भौमः ९ लग्नास्तदोषः १० कुमुहूर्त्तः ११ पुंस्त्रीजनूराशिगृहाष्टमलग्नं १२ विषानाड्यः १३ अनुक्तभांशाः १४ एकार्गलं १५ वारदोषः १६ औत्पातभं १७ ग्रहणर्क्षं १८ क्रूरविद्धं १९ क्रूरगम्यं २० पात २१ अन्येपिवर्ज्याः अकालवर्षा १ करकापातः २ अतिगर्जनः ३ हिमपातः ४ प्रचंडानिलः ५ परिवेषाः ६ प्रत्यर्कचंद्रः ७ इंद्रधनुः ८ तिथ्यृक्षवारभवाःकुयोगाः ९ एते पूर्वोक्ताश्च सति संभवे वर्ज्याः अथ प्रतिकूलविचारः वरवध्वोः कुले विवाहनिश्चये जाते सति मरणे त्रिपौरुषे मासोत्तरं विवाहः गुरुमरणे तु वत्सरादूर्ध्वं विवाहः निश्चयस्तु वाग्दाने कृते नांदीश्राद्धे जाते वा देशाचाराज्ज्ञेयं सूतकनिर्गमे शान्त्या वा करणीयं गुरुभिन्ने इत्युद्वाहः ६॥ अथ वधूप्रवेशः॥ नूतनपरिणीताया वध्वाः प्रथमो भर्तृगृहे प्रवेशो वधूप्रवेशः सच विवाहदिवसात् २।४।६।८।१०।१२।१४।५।७।९

दिवसेषु शुभः उर्ध्वं विषम मासवर्षयोः पंचवर्षात्परतः कामचारः नारदः सममासे समवर्षे यदि ललना भर्तृगृहमुपयाति भर्तुर्हरतेह्यायुः स्वयमपि रिष्टं समाप्नोति फलोदये वधूप्रवेशो व्रतबंधमोक्षां पुंसां पुनर्दारपरिग्रहं च नाब्दे द्वितीये विदधीत विद्वान् प्राहुर्वसिष्ठा त्रिपराशराद्याः उ. ३ रो. ह. ऽश्वि. ति. अभि. मृ. रे. चि. अनु. श्र. ध. मूं. म. स्वा. एषु भेषु सू. भौ. बु. विनास्थिरलग्ने द्विस्वभावे वा पूर्णा. जया. नंदा तिथिषु विवाहमासे च केचिद्बुधमंगीकुर्वंति वारेषु विवाहभातिरिक्तभानि निषेधयंति तथा रात्रावेव वधूप्रवेश इति च कथयंति रात्रौ विवाहभे शस्तः सन्मुहूर्त्ते स्थिरोदयः वधूप्रवेशो नैवात्र प्रतिशुक्राद्भयं विदुरिति

विवाहात्प्रथम मासेषु						पितृगृहे
ज्येष्ठे	मलमा.	आषा.	पौषे	क्षयमा.	भर्तृगृहे	चैत्रे
ज्येष्ठं	पतिं	श्वश्रूं	श्वशुरं	स्वयं मृता	फलं	स्वपितरं

वधूप्रवेशः अथ भर्तृगृहात् पितृगृहागमनमुहूर्त दारुण. उग्र. भिन्नेषु भेषु श. सू. भौ. भिन्नवारे सत्तिथौ लग्ने च कुयोगराहित्ये ॥ अथ दीपमालिकायां दीपदृष्टापनं चंद्रताराबले सायं मेषलग्ने नारीकृतनीराजनं अत एव कृतोपयामो पिपुमान्गृहीत्वं दृष्टापन्नाद्दीपदिने समेति अतो दीपोत्सवदिने चंद्रताराशुद्धावेव वधूप्रवेश द्विरागमौ कार्यौ परमागामि

दीपावल्यामव्यवहितायांनतत्रगुरुशुक्रयोरस्तादिविचारःसिं-
हगतादिविचारश्च ॥ अथद्विरागमः॥ सचकृतविवाहायाद्वि-
तीयवारं भर्तृगमोद्विरागमःविवाहतोविषमाब्दमासयोःमेष
वृश्चिककुंभगतरवौ शुक्लपक्षे शुभवारे वरस्य रविगुरुशुद्धौ
ह॰ऽश्वि॰ति॰ऽभि॰उ॰३रो॰स्वा॰पु॰श्र॰ध॰श॰मृ॰रे॰चि॰अनु॰मू॰ए-
षु भेषु २।३।६।१२ लग्नेषु सन्मुषदक्षिणयोःशुक्रंवर्जयित्वाबा-
लकगर्भवतीनवोढा यात्रिकश्च संमुखदक्षिणशुक्रेन गच्छेयुः
गच्छंतिचेत् बालोम्रियते गर्भवती स्रवद्गर्भा भवति नवोढावं-
ध्या भवति यात्रिको हतार्थोभवति।।अथास्य प्रतिप्रसवः।।
देशाद्युपद्रवे राजोपद्रवे दुर्भिक्षोपद्रवे विवाहयात्रायां तीर्थ-
यात्रायां राजभये वधूप्रवेशेच शुक्रदोषोन एक ग्रामेपि पि-
त्र्ये गृहे कुचपुष्पसंभवेपि शुक्रदोषोन रवीज्यादिशुद्धिरपि
कृताकृताकुचपुष्पसंभवे कुचपुष्पौ यदा पित्र्ये नशुद्धिरविजीव-
योः वरस्य वध्वाकाव्यश्च सन्मुखो दक्षिणोथवा शुभेलग्ने
चंद्रबलेसत्तिथौ धवसद्मनि यायान्नारीनदानस्याद्दोषोल्पो
धर्मसंकटात् भृगुः अंगीर वत्स वसिष्ठ कश्यप अत्रीणां कु-
लेपि नदोषः रेवत्यादिकृत्तिकांतं चंद्रेशुक्रोंधो भवति तदापि न
दोषः॥ अथ नूतनवध्वाःपाककर्म ॥ मृगोत्तरातिष्यकृशानुशा-
के श्रुतिभये ब्रह्मद्विदेवपौष्णे शुभे तिथौ व्यारवौ प्रकुर्यात्
नवावधूनूतनपाककर्म स्थिरेलग्ने सुखे शुद्धे सप्तमेचबला-
न्विते रंध्रे खेट विहीनेच नवोढा पाकमाचरेत् ॥ द्विरागमः॥

॥ अथाग्न्याधानम् ॥ ९ ॥ अग्न्याधानं दारकाले दायाद्यकाले वा उत्तरायणगे रवौ तथा स्वशाखाधिपोदये क्वचिद्दक्षिणायनेपि तथा जनके ग्रजे वोपासिताग्नौ तथा गुरुशुक्रोदये क्षयाधिकमासराहित्ये जनकाग्रजयो राज्ञयाच चंद्रबले रिक्तारहिततिथौ शनिवर्जितवारे ज्ये· कृ· ति· मृ· रे· उ· ३ रो· वि· एषु भेषु केचित् ह· चि· पु· कथयंति अधिकानि ११।४।१२।१० एतद्भिन्नलग्ने एषां नवांशेपि न चंद्रोपि लग्नेन शुभः रविवारे चेदग्न्याधानं रविर्नवमः चंद्रवारे चंद्रः पंचमः भौमे भौमस्तृतीयः जीवे जीवो लाभे बुधे बुधः २।११।१०।५।३ एतद्भावगतः शुभफलो भवत्यविरताग्निः धनुर्लग्ने जीवयुते अथवा मेषग भौमे ७।१० गते ३।६।११ गतेषु र· चं· श· राहुषु शुभो योगः अष्टमगे चंद्रे स्त्री नश्यति पापेष्टमगे स्वयं नश्यति शुभेष्टमे उभयो रोगः लग्नस्वामिनि नीचे युद्धजिते च खलग्रहैर्दुष्टां गतिं याति जीवचंद्रमंगलैः नीचैरस्तगैर्विजितैः शत्रुगृहगैरष्टमगैर्वा अग्न्याधानं न कुर्यात् तथा चैत्रे मेषरवावपि न चतुर्थ प्रहरे दक्षिणायने रात्रौ च नारंभः अथ पाकयज्ञानां कालं नामानि च तत्तद्वेदोदित भवारकालेषु पाकयज्ञाः ७ ते च अग्न्याधेयः १ अग्निहोत्रं २ दर्शपूर्णमास्यौ ३ चातुर्मास्यानि ४ वैश्वदेवपर्व वरुणप्रघासपर्व शाकमेध पर्व शुनासीरीयपर्व ४ पशुबंध ५ सौत्रामणी ६ पाकयज्ञः ७ एते सप्त हविर्यज्ञसंस्थाः अथ सोमसंस्थाः अग्निष्टोमः १ अत्यग्निष्टोम २ उक्थ्य ३

षोडशी ४ अतिरात्र ५ वाजपेय ६ आप्तोर्यामः ७ एते सोमसंस्थाः अथ पाकयज्ञसंस्थाः ७ श्रवणाकर्म १ आश्वयुजी कर्म २ आग्रहायणी कर्म ३ अपूपाष्टका ४ मांसाष्टका ५ शाकाष्टकाः ६ वर्षाष्टका ७ एते शुक्र गुर्वोरस्ते ग्रहणे क्षयमलमासौ संक्रांति श्चैतान्दोषान्परित्यज्य पाकयज्ञानाहुः सोमसंस्थानमधो निदाघे शिशिरे वेद विभौ २।७।९।१२ राशिगते ग्न्याधानोक्ततिथिवारभेषु ॥ अथ महाहोमः ॥ सौम्यायने दूषणमुक्तवासरे शुभ तिथौ सुलग्ने पू·ज·नं·तिथिषु र· चं·बु·शु·जी· वासरे अ·अ·रो·पूभा·ह·एषु भेष्वपि अग्न्याधानोक्त भेष्वपि महारुद्रादिहोमान् जगुः अथ पूर्णाहुतिः पूर्णातिथौ पूर्वोक्ताहुति भे शुभवासरशुभलग्ने ॥ अथावभृथस्नानम् ॥ नंदाजयासुपूर्णायां शुभलग्ने शुभवारे शुभ योगे च अथात्र चक्रत्रयं दर्शयति

उत्तरे हयाधिपः

		अ		
	भ			
	कृ		अं	
	रो		ति	
	मृ		पु	
			आ	

पूर्वे गजाधिपः

	म		
पू			
उ		ज्ये	
ह		अ	
चि		वि	
		स्वा	

दक्षिणे नराधिप

	मू	
पू		रे
उ		उ
श्र		पू
ध		श

निदर्शनम्

	पू·	
उ·	गजाधिप	द·
	अश्व पतिः — नर पतिः	
	प·	

एषु यथाक्रमात्पापवेधे भंगं बोध्यं आधारे पराधीनः आसने नीतियुक्तो प्रधानपुरुषादेशी प्रजाशांतिकरः पद्मर्क्षे पूर्णतुल्यः सिंहे सिंहइवसंग्रामप्रियः मंत्रिणामप्यसाध्यः सिंहासने तेजस्वी भीषणाकृतिश्चलचित्तो महाक्रोधी प्रजापीडाकरः अस्मिन्पापवेधोपि निंद्यः चंद्रे शुभावस्थागते पुंलग्ने च अभिषिक्तो नरपतिर्ब्राह्मणश्च शिवभाक् भवति अथैषु आवश्यकविचारो वाजपेयादिकर्तुर्ब्राह्मणस्य इतरेषां तुरंगमेशस्य तुरंगमे गजेशस्य गजे नरेशस्य रथे शुद्धिर्बोध्या अथैषु क्रमात् फलं शनिफलं च प्रदर्श्यते

तुरंगचक्रं तुरंगभात्			
२	मुखं	शुभ	०
२	नेत्रे	शुभ	०
२	कर्णौ	ऽशुभ	शनौ
२	शिर	ऽशुभ	शनौ
२	पुच्छं	ऽशुभ	शनौ
८	अंघ्री	ऽशुभ	शनौ
५	उदर	शुभ	०
५	पृष्ठे	ऽशुभ	शनौ

गजचक्रं गजभात्			
२	मुखं	शुभ	०
२	शुंडा	शुभ	०
२	नेत्रे	शुभ	०
२	कर्णौ	ऽशुभ	शनौ
२	मौलि	शुभ	०
८	पादौ	ऽशुभ	शनौ
२	लांगू०	ऽशुभ	शनौ
४	पृष्ठ	ऽशुभ	शनौ
४	उदरं	शुभ	०

रथचक्रेरविभुक्त भात्			
३	योक्त्रे	शुभ	०
३	नीडे	शुभ	०
३	दंडे	ऽशुभ	शनौ
३	ध्वजे	ऽशुभ	शनौ
३	मध्ये	शुभ	०
३	पार्ष्णी	शुभ	०
३	युगे	ऽशुभ	शनौ
३	अधः	शुभ	०
३	उर्ध्वं	ऽशुभ	शनौ

दुष्टांशकेज्जे यदि हेल्पपत्यं तदास्य पूज्यं पटबंधनं युतं मखाभिषेको हय हन्नृपघ्नं बलक्षयं तंत्र हरक्रमात्स्यात् गजेकुदेशे यदिहंस संततिर्नवाजपेयादिमखांत मज्जनात् पट्टाभिषेकादनुवेत्ति संगरात्सम्राडिलेशश्चयशोजयश्रियम् रथिनो यदिनामभंशुभांगे हरिजस्तत्स्थलजो मखाभिषेकः न समाहितवन्हिनाच राज्ञाक्रियते पट्टरथाधिरोहणं इति सत्रविराममज्जनं ह्युदितं यल्लिखितं मयेतदत्र त्रिविधावनिपाभिषेककाले त्रिविधैतद्बलयेक्षणोपयोगः॥ अथवानप्रस्थमुहूर्त्तः॥ प्रतिपौत्रमुखं विलोक्य महामखव्रतान्निर्वर्त्य देवशयनभिन्ने अस्तवर्जिते चंद्रबले लघु· धीर· आ· मृ· रे· अ· ध· पु· ह· एषु भेषु शुभवारे ५।६।३।७।८।११।१२ लग्नेषु शुभेषु केंद्रगेषु ९।५। बु·शु·जीव युते पूर्णाजयानंदा तिथिषु॥ अथ सन्न्यास मु·॥ अ· ध· ह· आ· रो· मृ· ति· उ· ३ एषु भेषु रिक्ता रहित तिथौ चं· बृ· बु· सू· वारेषु २।५।८ लग्नेषु केंद्रे शुभयुते॥ अथ दीक्षामाह पूर्वोक्तभेष्वदितियुतेषु आर्द्रारहितेषु पुंलग्ने सशुभे शुभवासरे लग्ने आतुरश्चेत्सर्वकालं॥ अथ स्त्रीशूद्रयोर्विशेषः पू· ३ श· अश्वि· मैत्रभे· पु· ध· ह· एषु भेषु श· सू· बु· शु· वारेषु विपर्वरिक्ते तिथौ॥ अथ पुष्पादिस्नान शुद्धिमाह॥ शुद्धकाले र· चं

शु॰ वृ॰ वासरे उग्रदारुणवर्जितभे शुभलग्ने कुयोगविष्ट्यादि रहिते आषाढकृष्णपक्षं भाद्रपदाश्विनमासौवर्जयित्वाकृष्ण दशम्यंतं तथा गुरुशुक्रयोरुदये पुष्पस्नानं एकवासस्नानं च विधेयम् इत्यग्न्याधानं ९ ॥ अथ राजाभिषेकः १० ॥ उत्तरायणगे रवौ तथावृश्चिकार्के तुलार्के कन्यार्केच सार्वभौमानां मंडलाधीशानां आषाढश्रावण भाद्रपदव्यतिरिक्तमासे तथा मलमासक्षयमासरहिते गुरुशुक्रोदये चंद्रबलेच भौमरविजन्मेशदशमेशानामुदये जन्मदशासाबल्येच दुर्गाधिपं मंडलाधीशवत् ग्रामाधीशं सदारिक्तातिथिवर्जिते भद्रादिकुयोगराहित्ये जी॰ चं॰ र॰ बु॰ शु॰ वारेषु सबलेषु उदितेषु भौमवारेपि क्षत्रियराज्ञोभिषेकः कैश्चनचैत्रोनिषिद्धः उ॰ ३ रो॰ मृ॰ ज्ये॰ ह॰ ऽश्वि॰ ति॰ ऽभि॰ श्र॰ ऽनु॰ रे॰ चि॰ एषु भेषु ५।६।७।८।३।११।१२ शीर्षोदयेलग्ने स्वजन्मलग्नराशिभ्यामुपचये ३।६।१०।११ पापैः ३।६।११ गतैः शुभैः १।४।७।१०।९।५।२ गतैः शीर्षोदयांशे गुरुर्लग्नकोणे १।५।९ भौमः ६ शुक्रः १० एतद्योगे भिषिक्तो राजलक्ष्म्यामोदते पापग्रहे २।१२ गते निःस्वः १ लग्नोपगेरोगी ७।४ सप्त चतुर्थगैः पदच्युतः ५ पुत्रगैः सर्वसुखहीनः १० कर्मगैर्भ्रष्टोत्सवो ८ मृत्युगैरनायुः १२।८।६ चंद्रः प्राणहापापे ३।६।११ जीवे १० बुधे ४ राजलक्ष्मीसिद्धिः शुभे ५।९।१।४।७।१०।३।२।११ गतेः पापे ३।६।११ गते ६।८।३।१२ एतद्भावभि-

न्न चंद्रेणाभिषेकः शुभः३।११ सू. श. १०।४ जीवः स्थिर-
राज्यः॥ अथातपत्रचक्रमाह॥

सूर्यभात्		
२	नले	बलार्थहितं
४	स्कंदयुगे	श्रेष्टम्
४	पश्चात्	मरणम्
४	पूर्वे	कीर्तिवर्द्धनम्
२	भद्रासने	भीतिम्
४	चामरयोः	हितम्
४	पत्रकरणे	मरणम्
३	मौलौ	सार्वभौमताम्

ग्रह नक्षत्र योगे छत्रधृतिः

ग्रं.	
श.	पुनर्वसु
शु.	कृत्तिका
बु.	उ.भाद्रपदा
बृ.	श्रवणं
मं.	मूलं
चं.	स्वातिः
सू.	पू.फाल्गुनी

उभयचक्रशुद्धशुद्धौ अभिषेके महाराजः स्यात् अथ तत्का-
लाभिषेकमाह तपोधनाराधित राज्यलब्धौ तत्कालमार्या
स्त्वभिषेकमूचुः स्ववंशराज्येन्यविभाइतेवा राज्यावसाने नर-
देवतायाः सूर्यव्यतिरिक्तैः पंचभिरुच्चैर्नीच कुलजोपि राजा
तस्याप्यभिषेकादिर्नजन्मतोभिषिक्तत्वात् हारितः छत्रमंड-
ले भशुद्धिं स्वीकरोति सत्याचार्यादयस्तु सिंहासने भशुद्धिं
कथयंति वत्सः पताकाशुद्धौ स्वीकरोति अपरे चामरे भशुद्धिं

स्वीकुर्वंति एतदग्न्याधाने गजपत्यादि पर्यायैर्दर्शितं वशिष्ट रैभ्यात्रिपराशरादिभिरातपत्रचक्रभशुद्धौ स्वीकृतं॥ अथ सभा रचनामाह॥ शुभवासरतिथिभोदयेषु गोचरशुद्धौ धनुराकारांन्यस्तनृपासनोदरां विदध्यात्॥ अथसभाप्रवेशमाह॥ सध्वजं गजेंद्रमग्ने कृत्वा तुरंगान्सादिनो रथान्द्वारपालान्मंत्रिणश्च पुरोहितोक्तसमये राजयोगयुतेलग्ने प्रविशेत् गणेशादिपूजनपूर्वकं भद्रासनादिरोहणं कुर्यात् शिल्पवर्गपुरोधसंचगोभूहिरण्यादिभिः संतोषयेत्॥ अथदामबंधनमुहूर्तः॥ नृपाभिषेकोक्तदिने गृहनगरग्रामादिषु॥ अथपटमंडपमु॰॥ उ॰३ रो॰ मृ॰ रे॰ चि॰ ऽनु॰ श्र॰ ध॰ एषु भेषु चं॰ बु॰ जी॰ शु॰ वासरे रिक्तारहिततिथौ॥ अथवितानादिबंधनमुहूर्तः॥ शु॰ जी॰ चं॰ र॰ वासरे उर्ध्वास्यभैः शुभयुक्तस्थिरलग्ने कंटके शुभयोगे रिक्तारहिततिथौ कुयोगराहित्ये॥ अथसेनारचनमु॰॥ स्वा॰ भ॰ ऽऽ श्ले॰ ध॰ रे॰ ह॰ ऽनु॰ पु॰ उ॰ ३ रो॰ एषु भेषु जया ३।८।१३ तिथिषु र॰ भौ॰ वारयोः स्थिरलग्ने षष्ठेपापयुते अष्टमशुद्धेलग्ने॥ अथ युवराजाभिषेकस्तु ॥ राजाभिषेकवत्॥ अथराज्ञांचामरछत्रदोलासिंहासनादिधारणमु॰॥ रो॰ उ॰ ३ अनु॰ चि॰ मृ॰ रे॰ ऽभि॰ ति॰ ऽश्वि॰ ह॰ ज्ये॰ श्र॰ एषु भेषु जयानंदातिथ्योः शुभवासरलग्ने दशमाष्टमशुद्धे इतिराज्याभिषेकः॥१०॥ अथयात्रामु॰ ११ स्वदेशादितरत्रगमनं ग्रामांतरगमनं गेहाद्गेहांतरगमनं वा यात्रा अस्यांचराज्ञः प्रतिशुक्रादिको दोषः यतोवसिष्ठः प्रतिशुक्रं

प्रतिबुधं प्रत्यंगारकमेवच अपिशक्रसमोराजा हतसैन्योनिवर्त्त-
ते नृणांतुसाधारणो दोषः यत्तु प्रतिशुक्रादिदोषोयं प्रथमेग-
मने नृणां राज्ञां विजययात्रायां प्रतिशुक्रंच दुष्यतीतिवचसा
राज्ञांदोषाभावः तत्तुच्छम् विजययात्रेत्यस्य विजयदशम्यामार
ब्ध यात्रायामित्यर्थः तदारब्धायां प्रतिशुक्रादिदोषो भवत्येव पू-
र्वोक्त गोत्राणां तथा रेवत्यादि मृगांत भेषुचंद्रेचदोषोन यात्रामुहू-
र्त्ततुज्ञातजन्मनामेवनृणां अज्ञातजन्मनांतु प्रश्नशकुनादिभिः
गर्गः सदशायां शुभायात्रा अष्टवर्गेशुभेसमा न्यूनातत्काल
लग्नादौ तिथ्यादावधमामता॥ जननराशितनूयदिलग्नगोतद
धिपोयदिवाततएववा॥ त्रिरिपुखायगृहंयदिचोदयो विजयएव
भवेद्वसुधापतेः रिपुजन्मलग्न भमथाधिपो तयोस्त्ततएव
वोपचयस ३।६।१०।११ भवेद्भवेत् हिबुकेद्युनेथशुभवर्गक
स्तनोयदिमस्तकोदयगृहंतदाजयः स्वजन्मभात् १।३।५।७
तारकानेष्टा॥ अथयात्राभेदाः॥ लघु १ मध्य २ दीर्घ ३ द्वादश
योजनांतं लघु १ पंचविंशति योजनांतं मध्या २ अतःपरंदी-
र्घा तथायुद्धयात्रा १ तीर्थयात्रा २ लाभयात्रा ३ अथयात्रास-
मयः सर्वासुयात्रासु शुक्रास्ते नगंतव्यम् तथाजन्मेशे जन्मद-
शेशेस्तंगतेपि नगंतव्यं तीर्थयात्रासु गुरुशुक्रयोरस्तकालो
वर्ज्यः सिंहगो गुरुश्च नीचगोपिवर्ज्यः नतीर्थकामः सतिपा-
णिजायुधे नृजोशिशौ वृद्ध घनेचनीचगे नरोमरार्च्ये गमनंप्र-
कारयेद्धिनैवकुंभस्थलगोतमी गयाःतिथौचतुर्थ्यामथ पंच-

यात्रामासाः				ऋतुफलम्				
मे.	सिं.	ध.	रवौ	श्रेष्ठा	वर्षा	शरत्	शिशिर	वसंतः
मि. क.	वृ. तु.	कुं. मी.	रवौ	मध्या	निंद्या	शुभा	शुभा	शुभा
कर्क	वृश्चिक	मीन	रवौ	ऽध.	हिम.	निषि	ग्रीष्म	निषि

यात्राभान्याह

अश्वि	पु.	ऽनु.	मृ.	ति.	रे.	ह.	श्र.	ध.	शुभा
रो.	उ. ३	पू. ३	ज्ये.	मू.	श.	०	०	०	मध्या
भ.	कृ.	आ.	ऽश्ले	म.	चि.	स्वा.	वि.	०	निंद्या
श्र.	ह.	मृ.	पुष्य	०	०	०	०	सर्वदा	शुभा
पू. ३	कृ	म.	भ.	स्वा.	वि.	ज्ये.	ऽश्ले.	चि.	आवश्यके
१६	२१	११	७	१४	१४	१४	१४	४०	त्याज्यघटि

तिथयः

कृ १	२	३	५	७	१०	११	१३	उभयप
वित्तं प्रमोदं प्रतिपत्प्रयातु	वसुंधरालाभवती	अर्थागमं गमनतोपि	अनेकविधसौख्यफलं	अभीष्टफलभूमिफलं	अभिमतमाभिप्रकुर्यात्	विविधसौख्यसमृद्धि- नायः	श्रेयःफलमनुवृद्धिः	फलानि

दश्यां षष्ठ्यां नवम्यामुपयाति यातां शत्रोर्वशंयाति शतैकदंति दा-
नांबुसंसिक्त महीतलोपि यो द्वादशीं प्राप्य चतुर्दशीं वा मतिं
प्रयाणे कुरुतेष्टमीं वा स नाशमायात्यचिरेण राजा राजानुमा
मात्य विलोमचेष्टः बृहस्पतिः सर्वाःस्युस्तिथयः श्रेष्ठाः शुक्ले
त्वाद्यद्वयंविना कृष्णेप्यंत्यत्रयं चैव षष्ठीं रिक्तां परित्यजेत्

नारदः षष्ठ्यष्टमी द्वादशीषु रिक्तामापूर्णिमासु च यात्राशु- कुप्रतिपदि निधनायाधनाय च ॥ अथ मासेषु विशेषः ॥ चंद्र सूर्ययोः समायनत्वे सर्वदिक्षु गमः शुभो दिवा रात्रौ च

वारफलम्							
सू.	चं.	मं.	बु.	बृ.	शु.	श.	वाराः
हानिः	धनक्षय.	भंगं	सौख्य.	श्रेयम्	भोग	सैन्यनाश	फलानि

दिक्शूलंसमुदायेन

ई.		पूर्व		आ.
	बु. श.	प्रातः चं. श. ज्ये.	चं. जी.	
उ.	अर्द्धरात्रे मं. बु. उ. भा.		मध्यान्हे जी. पू. भा.	द.
	बु. सू.	संध्यायां सू. शु. रो.	जी. शु.	
वाय.		पश्चिम		नैऋ.

अत्रोत्तरस्यां पूर्वस्या अंतर्भावः दक्षिणस्यां पश्चिमाया अंतर्भावः भिन्नायनत्वे दिवा रवि दिशं रात्रौ चंद्र दिशं चातुर्मास्ये फाल्गुनशुक्लपक्षे च बृहद्यात्रा निषिद्धा तथा सूर्य भौम शनिभि र्विषमैस्तथोपरागदूषितायने च समुद्र यात्रा बृहद्यात्रा च न तथा द्विस्वभाव राशिगसूर्ये बृहद्या- त्रा न तथा २।५।८ गते सूर्ये नो यात्रा न तथा भाद्रपदे बृ हन्मध्ययात्रे न आश्विने तीर्थयात्रा न

अथवारकाल			वारपाशः		
ई	पू श	आ शु	ई. बु	पू. भौ	आ. चं.
उ. सू.	वारका.	नै. द	उ. जी.	वारपाश	सू. द
वा. चं.	प. मं.	नै. बु.	वा. शु.	प. श.	नैर्ऋत्य

चंद्रवासो वर्ण फ.			तिथिपाश		
०	पू.-युध १।५।९ रक्त	०	ई.	पू. ४।१२।२० २८	आ.
कृष्ण उ. ४।८।१२ मृत्यु	चंद्रवासः	सिद्धि २।६।१० द. श्वेत	उ. ६।१४ ९।२२	तिथिपाश	२३।२ १०।१८ द.
०	पीत ३।७।११ लक्ष्मी प.	०	वा.	प. १२।२० २८।३०	नैऋ.

योगिनी			तिथिकालादि		
ई चामुं.	पू.	आ.		पू.	
८।३०	ब्राम्ही १।९	कौमारी ३।११	०	७।८।१५।१९ २३।२४	०
माहेश्वरी उ. २।१०	योगिनी	वाराही ५।१३ द.	उ. १।२।९ २।१०।१७ १८ २५।२६	तिथिकालादिच.	२।५।६।१३ द १४।२१ २२।२९।३०
चंडिका वा. ७ १५	इंद्राणी ६।१४ प.	वैष्णवी ४।१२ नै	०	३।४।११।१२ ५।४।११।२० २१।२८ प.	०

अथैकस्मिन्दिनेपि योगिनी भोगः

पू.	वा.	द.	ई.	प.	आ.	उ.	नै.	दिशः
३ ४५	७ ३०	११ ४५	१५ ०	१८ ४५	२२ ३०	२६ १५	३० ०	घट्यः
३३ ४५	३७ ३०	४१ ४५	४५ ०	४८ ४५	५२ ३०	५६ १५	६० ०	घट्य

अथ पाशकालघातादीनांगणितमुच्यते ॥ गतचंद्रादिनेनचतुः

स्थिते स्वयमाब्ध्यंग०।२।४।६ युते हृते गजैः ८ स्वादिशित्य-
जपाश घातके भिमुखे कालनिपातकेगमिन् अत्रगतचांद्रदि-
नेचतुः स्थापिते क्रमात् ०।२।४।६ युते अष्टशेषिते शेषांकस-
मदिशिक्रमात्पाश धात कालनिपातनानि भवंति अथयोगि-
नी विचारः तिथयः संमुख वामगानशस्ताः तथादक्षे पृष्ठेयो-
गिनी राहु युक्ता यस्यैकोपिशत्रुलक्षांनिहंति कार्यसिद्धौच
योगिनी संमुखाद्यूते गमे युद्धेच मृत्युदा अशुभादक्षिणे भा-
गेवामे पृष्ठेशुभप्रभा अत्रैकस्याएवयोगिन्याः कार्यविशे-
षेण विरोध परिहारः तादृशवाक्यसमुदायेन समरसारीय
वाक्यं यामल मूलं नरपतिमूलं वान्तत्रच जयलक्ष्म्यां युद्धया-
त्रायांवामेऽशुभादक्षेशुभा फलार्थियात्रायांवामे शुभादक्षे
ऽशुभा शकुनइव अतएव ज्योतिर्निबंधेपि रिपोर्जयार्थि
नां यानेयोगिनी दक्षिणेशुभा व्यवहारार्थिनां याने वामेश
स्ता समीरिता तीक्ष्णधारासिहस्ताच युद्धे दक्षिणगाशु-
भा परंचेदंनमनोरमं एवंच यात्राद्वैविध्य प्रसंगः चंद्रा-
दीनामपि युद्धयात्रायां वैलक्षण्यं वक्तुमुचितं नहिच तादृ-
शोपलंभः अतोन्यथा समाधिः यामिले राहुयुक्तायदाद-
क्षिणगाशुभा राहुयुतानचेत्तदान निर्बलत्वात् यतउक्तं
योगिनी राहु युक्ताचेद्दक्षेस्याच्छुभदायिका वियुताराहु-
णा सातु वामेपि शुभदायिका परंमन्मते विकल्प एवस-
मंजसोनचविषय विभागोनिर्मूलत्वात् कल्पना मूलक

त्वेतु दोषांतरापत्रेरसक्यपरिहार्य्यत्वात् अथदिवारा-
त्रिविभागोयात्रायाः गुणपति तिथावनिष्टे धिष्ण्ये गमनंदि-
वा प्रशंसति गुणपतिधिष्ण्ये रात्रौ तिथौच गुणवर्जिते
मुनयः स्नात्वागच्छेद्विधोर्वारे अस्नात्वाबुधशुक्रयोः
अभुक्त्वागुरुभानुभ्यां भुक्त्वा भौमशनैश्चरे अथचं-
द्रफलम् सम्मुखे अर्थलाभाय दक्षिणे सुखसंपदः पृ-
ष्ठतोमरणंचैव वामेचंद्रे धनक्षयः सर्वेदोषालयं यांति
पूर्णेचंद्रे हि संमुखे

घटिकात्मकचंद्रवासचक्रम्								
पू.	द.	प.	उ.	पू.	द.	प.	उ.	दिशि
१७	१५	२१	१६	१७	१४	२०	१४	घट्यः

दिवारात्रौचराहुचक्रं		
ई १६	पू ४	आ. २४
उ. २८	यामार्ध राहु	१२ द.
वा. ८	२० प.	३२ नै.

लालाटिका		
बृ. बृ.	र.	शु शु.
बु	प्रागाद्याः	भौ.
चं. चं.	श.	रा. रा.

केचिद्दृष्टदिक्ष्वेवेदमाहुः चतुर्दिक्षु बहुसम्मतमिदम्

अथ लालाटिका ॥ लालाटिकाः पूर्वदिशोऽशुभाः स्यु-
र्लग्नेरवीरिष्फ भवे भृगुश्च खेस्हक् नवाष्टागुरगार्कि

रंगधीदुः सुखेज्ञस्त्रिधने सुरेज्यः उषप्रशस्तते गर्गः शकुनंच बृहस्पतिः अंगिरामनउत्साहं विप्रवाक्यं जनार्दनः उषः कालो विनापूर्वा गोधूलिः पश्चिमांविना विनोत्तरा निशीथः सन् याने याम्यांविनाभिजित् अथ सर्वत्र घटिकात्मकचारे चंद्र योगिनीराह्वात्मके स्पष्टानाड्यो बोध्याः अथयात्रालग्नं शीर्षोदयेयातुरभीष्टसिद्धि ५।६।७।८।३ कुंभो मीनौशीर्षोदय गावपिनिंद्यो यातव्यकाष्ठा मुखमिष्ट लग्नं जन्मोदये सिद्धि करं प्रयाणं नजन्मराशेरुदये उभाभ्यां मुपचये जन्मलग्नस्थरविराशि द्वितीयराशौ वेशिसंज्ञकेच शुभम् दिवादिनबले ५।६।७।८।११।१२ रात्रौ रात्रिबले २।१।९।४।३।१० गंतव्यंचरेशुभम् व्यंगेमध्यम् स्थिरेधमं येचभावालग्ने शुभसंयुतास्ते ग्राह्या ४।८।२ लग्नानिश्रेष्ठानि न स्वराशिवश्य लग्ने यात्रा अथा थैवरक्षक वर्धक ताननायक कारकउपनायक संज्ञाग्रहाणाम् जन्मसूर्याद्वितीयगः शुभखेटयुतो राशिर्यात्रायां लग्नगश्चेद्रक्षकोभवति जन्मलग्नाद्दशमगः शुभयुतोवर्धकोभवति जन्मचंद्रादुपचयगोराशिः शुभयुतस्तान् संज्ञः जन्मन्युपचय संस्थानायक संज्ञा ग्रहाभावाश्च संज्ञिनोबोध्याः जन्मलग्नस्थः सुखस्थः दशमस्थ एकदश स्थश्च परस्परं कारक संज्ञकः उंगसहन्स्वगृहांशेकारः अस्माद्दशमगः कारक संज्ञकः स्वोच्चत्रिकोण संस्थानायकसंज्ञाभाग्यगता उपनायकसंज्ञा रक्षकावर्धकास्थयेच जन्मनि

नायकाः तेषां लग्नेषुनिःशंकं यात्रा लग्नेनियोजयेत् अशस्तोपि भवेच्छस्तः शस्तोपि विफलायते ग्रहोराशिश्चलग्नस्थो रक्षकादिप्रभेदतः दिगीश्वरो ललाटस्थो यदिवादिग्बलान्वितः वधबंध प्रदोयातुः केन्द्रगस्तु जयार्थदः दिगीशाः सूर्यशुक्रारराह्वार्कि दुजसूरयः दिगीश्वरे ललाटस्थेयातुर्न पुनरागमः ललाटेग्निभयंकरोतिदिनकृत्कोशक्षयं लोहितः शत्रूणां विजयः शशांकतनयः सेनाविमर्दंगुरुः मृत्युं भास्करनंदनो नरपते र्व्याधिंतथाविप्रराट् एतान्येव समस्त खेचर फलान्येकःसितोयत्सतिरिपोर्वारे विलग्नगः सौम्योपिनशुभदः मित्रवारे पापोपिशुभदः साम्नोजीवासि·

तौनाथौदंडस्यकुजभास्करौ चंद्रोदानस्यभेदस्य राहुकेतु बुधार्कजाः यांतिसामादयःसिद्धिं केन्द्रोपचयसंस्थितैः स्वनाथैर्वीर्यसंयुक्तो रस्त द्वारैर्वातदंशके: विंशोपकाः शस्ताः क्रूराः ३।११।६।१० सौम्याः ३ ११।१० चंद्रः ६।१।१२ त्यक्ता ७ शुक्रोनेष्टः १० शनिर्नेष्टः यात्रांगेशो ८।६।७।१२ इष्टोन अथप्रत्येकभावफलं

रव्यादीनाम्

	र.	चं.	मं.	बु.	बृ.	शु.	श.	रा.के.
१	संतापं	कलहं	सर्पभीः	स्फरवं	संपत्तिः	विलासं	बंधवधे	ए
२	अर्थनाश	धनं	सैन्यभेदं	धनदः	धनं	धनं	धनहानि	ए
३	भूमिदः	धनं	धनादि	लाभः	श्रमं	स्फरवं	रिपुनाश	ए
४	बंधुद्वेषः	बंधुलाभं	बंधुहानि	सुरवं	राज्यसन्मा	श्रियं	विनाशय	ए
५	दुर्मतिं	अर्थप्रदः	शत्रुपीडा	पुत्रादि	ईप्सितं	मानं	धननाश	ए
६	वांछितं	शत्रुदः	शत्रुनाशं	शत्रुभीतिः	शत्रुवश्य	शत्रुवश्य	शत्रुनाश	शीघ्रफलौ
७	स्त्रीविरो.	धनभूमि लाभदः	अर्थक्षयं	वरांगना	कीर्ति	राज्यं हतिः	उत्साह भंगः	ए
८	नानारोगं	शोकदः	मृत्युदः	श्रीभामं	प्राणदा	ईप्सितं	शस्त्रभी.	ए
९	धर्महा धनदः	श्रीः	धर्महत्	धर्म	धर्म	कामं	धर्मनाशं	ए
१०	सन्मानं	धनहा	शस्तः	ईप्सितं	कीर्ति	प्रभूत धनं	कर्मनाशं	शुभदौ
११	लाभं	ऐश्वर्यं	लाभः	लाभः	श्रियं	धनं	लाभं	ए.
१२	व्ययं	भयं	व्रणकृत	धनहा.	सुरवदुः.	अभीष्टं	अनर्थदः	ए
		कुशश्चेत्कष्टदः		लुप्तोधनहा				

अथात्रविशेषः अपूर्णः शोकदश्चंद्रोलग्ने क्षीणस्तथारिपोः कर्कि गोज ४।२।१ स्थितः षष्ठो निजदुष्टफलापहः सूर्यो राजभयंक रोति शशिना युक्तोर्थहानिं भृगुः स्थानभ्रंशकरो गुरुः शशिसु तः संतापदोषंमहत् मृत्युं सूर्यसुतो ददातिनियतं शस्त्रान्तथाभू सुत तस्माच्चंद्रयुतिं विहायमतिमान्यात्रां प्रकुर्यात्सदा त्रिकमा योपगोराहु प्रयाणे सत्फलप्रदः केतुर्यातव्यकाष्ठायां सन्नताग्ने शुचप्रदः अथ प्रत्येकफलम् दिनकृद्दिवसेतथांशके यात्रालग्न गतेथवारवौ संतापयतिस्मरातुरं वेश्येवार्थविवर्जितंनरम् उ- दये शशिनोंशके न्हिवाभवति गतोनचिरेण दुर्मनाः प्रमदामिव यातयौवनां रत्यर्थं समवाप्यकर्कशाम् भौमेदयेंशेह निवासया- त्रा करोतिवंधं वधमर्थनाशं संसेविनः पापपराङ्मुखेन मनोभ- वार्त्तेनपरांगनेव बुधस्यलग्नांशक वासरेषु यात्रानरं प्रीणयति प्रकामं भावानुरक्ता प्रवरांगनेव विदग्धचेष्टामदनाभितप्ता गु- रोर्विलग्नांशदिनेषुयात्रा हितानुवंधेप्सित कामदाच जायेवभ- क्ता मनसोनुकूला कलाभिवृद्ध्यै रतिदाहिताच यात्राभृगोरंशदि नोदयेषु प्रीणातिकर्मैर्विविधैर्थियासुं विलासिनी कामवसेनयानं भोगैरनेकैर्मदनातुरेव - द्युलग्नभागेषु शनेश्चयात्रा प्राणछिदा दीन्प्रकरोतिदोषान् अन्यप्रसक्ता वनितेवमोहान्निषेवितामन्मथ मोहितेन - अथजीवमृतपक्षौ राहुयुतंभं कर्तरीसंज्ञं तदग्रिम १३ त्रयोदशभानिजीवपक्षः सूर्येमृतजीवपक्षे चंद्रेजीवपक्षभेयात्रा शुभा सूर्यचंद्रौवा जीवपक्षभे तदपिशुभा सूर्योजीवपक्षे चन्द्रे

मृतपक्षे यात्रानशुभा सूर्य्यचन्द्रौ द्वावपिमृतपक्षगौतदायात्राऽति क्षयदा यः स्थितः सस्थाईतस्य सूर्य्योधीशः यः स्थानादन्यत्रया-ति सयायीतत्स्वामीचन्द्रः जीवपक्षे तस्यतस्यजयः यथाराहु रधु नानुराधायां तद्धंकर्त्तरीज्येष्ठातः भरण्यंतं जीवपक्षः विशाखा तो भानि१३ त्रयोदशमृतपक्षः कृत्तिका१५ भंग्रस्तं अत्रोभौजीवपक्षे संधिकरौ मृतेऽभयोर्हानिदाविति नरपतौ विस्तरः

उदाहृति		
मृ.	कृ.	जी.
वि.	भ.	ज्ये.
स्वा.		मू.
चि.		पू.
ह.		उ.
उ.		ऽभि
पू.		श्र.
म.		ध.
ऽश्ले..		श.
पु.		पू.
पु.		उ.
आ.		रे.
मृ.		.अ.
रो.	कृ.	भ.

अकुलचक्रम्	कुलचक्रम्
स्वा.भ.ऽश्ले धं.	.पू३ऽश्वि.ति.म.मृः.
रे. ह.ऽनु.पू.उ.३	अ. कृ.वि.ज्ये.चि.
रो १।३।५।७।९।११ १३।१५ ति. र. चं. वृ. श. एषु युद्धे.	नक्ष. मं. शु. वा स. ४ ८ १० १२ १४ तिथ.
यायीजयी भवति.	एषु युद्धारंभेस्थायीजयी स्यात्

कुलाकुलम् मू. श. आ रो बुधे २।६।१० तिथयः एषु युद्धारंभेसंधिःस्यात् कुलाकुलादिकं जीवपक्षमृतपक्षौ अवश्य यो-धयोर्विचार्य्ये तथाचक्रूर यात्रायामवश्यं वोध्यंशुभायांनात्यावश्यकतायतः कुलाकुलं वीक्ष्यं योद्धे कर्मणि सर्वदा राहुभक्तादिकंचापि वीक्ष्यंतत्रै-व सर्वथा शुभायां नाति योज्यंहि योज्यंचोभय पक्षयोः क्रूरायात्रा रा-हुवलेषडंगे कालचक्रके चंद्रकालानलोवापी सूर्य्यकालानले तथा

मृगया याम्मपि तथा बोध्यं बुद्धिमतासदा कुलाकुलादिषु राहु योगिन्योश्चंद्रस्यचबलंचापिविचार्य्यं नहि कुलाकुलमेबाव लंव्येतर सामग्रीचोपेक्ष्येति·

पौषमासादितिथयः

पौ·	मा·	फा·	चै·	वै·	ज्ये·	आ·	श्रा·	भा·	आ·	का·	मा·	पूर्व·	दक्षिण	पश्चिम	उत्तर·
१	२	३	४	५	६	७	८	९	१०	११	१२	सौख्य	क्लेश	प्रीतिः	अर्थागमः
२	३	४	५	६	७	८	९	१०	११	१२	१	शून्य	नै	नै	मिश्र
३	४	५	६	७	८	९	१०	११	१२	१	२	द्रव्य क्लेश	दुःख	इष्ट	ध·ला·
४	५	६	७	८	९	१०	११	१२	१	२	३	लाभ	सौख्य	मं·	द्र·ला·
५	६	७	८	९	१०	११	१२	१	२	३	४	लाभ	द्र·प्रा·	धन	सौ·
६	७	८	९	१०	११	१२	१	२	३	४	५	प्रीति	लाभ	मृ·	द्र·प्रा·
७	८	९	१०	११	१२	१	२	३	४	५	६	लाभ	कलह	लाभ	दुःख
८	९	१०	११	१२	१	२	३	४	५	६	७	कष्ट	सौख्य	क्लेश	लाभ
९	१०	११	१२	१	२	३	४	५	६	७	८	सौख्य	लाभ	सि·	क·
१०	११	१२	१	२	३	४	५	६	७	८	९	क्लेश	कष्ट	द्र·ला	ध·ला·
११	१२	१	२	३	४	५	६	७	८	९	१०	मृत्यु·	लाभ	द्र·ना	शू·
१२	१	२	३	४	५	६	७	८	९	१०	११	शू·	सौख्य	मृ·	बंधक

धर्म्मार्थकामादि चक्रम्.							
अ.	शि.	ऽश्ले.	ध.	श.	वि.	ऽनु.	धर्म्मे
भ.	पूभा	ज्ये.	श्र.	पू.	म.	स्वा.	अर्थे
कृ.	आ.	उभा.	चि.	मू.	ऽभि.	पूभा.	कामे
रो.	पूषा.	मृ.	रे.	उषा.	उभा.	ह.	मोक्षे

धर्म्मगे भास्करे वित्तमोक्षे शशीवित्तगे धर्म्ममोक्षार्थगः शस्यते कामगे धर्म्ममोक्षार्थगः शोभने मोक्षगे- केवलं धर्म्मगः प्रोच्यते शून्यंशः वारेशमैंद्यांधिनि वेऽयपश्येत्प्रदक्षिणस्थानगता क्रमेण- यामार्धभोगः शनिरस्तियस्यांतदानयायात्ककुभं तदातास् अथ सर्वांक योगो तिथि· भ· वार नामाक्षरयोगे त्रिस्थे क्रमात् २-३-४ द्वित्रिचतुर्भिर्गुणिते क्रमात् ६-७-८ रससप्ताष्ट भाजिते क्रमात् ०-०-० आदिशून्ये हानिः मध्यशून्ये भयम्· अंत्यशून्ये मृत्युः स्थानत्रये शून्ययोगे निश्चितं मृत्युः स्थानत्रयेंक युजिजयः अत्र तिथयः शुक्लप्रतिपत्तः अपरे तिथिवारभयोगैक्यं त्रिषुस्थानेषु क्रमात् ७-८-३ सप्ताष्टगुणशेषितं स्थानत्रयेंकयोगे सर्वांकः अथ महाडलभ्रमौ- सूर्य्यभाद्दिनभमितिः ७ सप्तष्टा २-७ शेषे महाडलः ३-५ शेषेऽभ्रमः उभावपिनिंद्यौ- अभ्रमस्तु यात्रायामेवनिषिद्धः महाडलस्तु यात्रायंत्र हलप्रवाह समरे चौर्य्येच संधौतथा कूपाराम तडागबंधनविधौ त्याज्यंसदैवाडलम् यत्नान्नात्र शुभेषु मंगलविधौ दोषोन तस्य क्वचित्· अथ द्विवरं दिनभं रविभाद्गण्यं शुक्लादितिथ्यावारेणच युतं नवाप्तं ७ शेषंचेद्विवरं गमने श्रेष्ठम्· अथ घवाडकः रविभाद्दिनभंगणयि-

त्वा२गुणंतिथियुतंच ७ शेषितं ३ शेषघवाडकं यात्रायांशु भदम् आश्ले शनौतु गमनं बहुविघ्नदंस्यात्.

अथ विघ्न कालचक्रम्		
ई. बु.	पू.	आ र बृ.
उ.		द.
वा. मं. श.	प.	चं. शु. नै.

योवारस्तस्यां विदिक्षु मुखंतस्य वर्ज्जयेत् यात्रायां अस्य मुखं पृष्टे कृत्वा यात्रायां जयः

केचिद्रात्रिशेष ४ घटीभ्यदिनार्धयामांतं पूर्वाज्वलिताः तत्रत्रिष्वपि यात्रा न शुभदा

दग्धादि दिशः उदयात्.									
	७ ३०	१५ ०	२२ ३०	३० ०	३७ ३०	४५ ०	५२ ३०	६० ०	नाड्या.
इष्टहर	पू.	आ.	द.	नै.	प.	वा.	उ.	ई	ज्वली.
भ्रमम्	आ.	द.	नै.	प.	वा.	उ.	ई.	पू.	धूमित
अभंग	ई.	पू.	आ.	द.	नै.	प.	वा.	उ.	दग्ध.

परिघ दंडः

कृ रो. मृ. आ. पु. ति आ.

म. पू. उ. ह. चि. स्वा. वि.

पूर्व

पूर्व पश्चिम योः

परिघः

दक्षिणोत्तर योश्च.

अनु. ज्ये. मू. पू. उ. श्र. ध.

श. पू. उ. रे. अ. भ.

अन्यच्छ्र द्वावपि मातिमतापारिघोऽलंघनीयः आवश्यके शूला भावे तनुबलेच परिघःसुलंघ्योभवति योगिनी राह्वोरपि शुद्धिश्चेत्तदा.

अथ राशीनां घातचक्रम्

·	मे·	वृ·	मि·	क·	सिं·	क·	तु·	वृ·	ध·	म·	कुं·	मी·	·
र·	४	८	१२	५	४	१	६	१०	७	११	२	३	र·
चं·	१	५	९	२	६	१०	३	७	४	८	११	१२	चं·
भौ·	५	९	१	६	१०	२	७	११	८	१२	५	४	भौ·
बु·	२	६	१०	३	७	११	४	८	५	९	१२	१	बु·
बृ·	६	३	२	७	११	७	६	१२	९	१	४	५	बृ·
शु·	३	७	११	४	८	१२	५	९	६	१०	१	२	शु
श·	७	११	३	८	१२	४	९	१	१०	२	५	६	श·
रा·	८	१२	४	९	१	५	१०	२	१०	३	६	७	रा·
के·	९	११	५	१०	२	६	११	३	११	४	५	६	के·
मा·	का·	मार्ग·	पौ·	मा·	फा·	चै·	वै·	ज्ये·	ऽऽ	श्रा·	भा·	आ·	मा·
ति·	नं·	पू·	भ·	ज·	पू·	भ·	रि·	नं·	भ·	रि·	ज·	पू·	ती·
नं·	म·	ह·	स्वा·	ऽनु·	मू·	श्र·	श	रे·	भ·	रो·	आ·	ह·	न·
यो·	ह·	वि·	स्वा·	सा·	क्र·	सा·	प·	शु·	सा	व	धु·	व्या·	यो·
वा·	श·	वृ·	चं	बु·	श·	चं·	वृ·	श·	शु·	भौ·	स्क·	शु·	वा·

अथास्यविचारः

युद्धेविवाहेच कुमारिपूजने यानेऽक्रऐगेराजनिषेवनेच विचिंनयेद्धा-
तफलंमनस्वी विवाहचूडादिशुभेनचिंतयेत् अथपरिघदोषनिर्मु
क्तभानि मैत्रार्क पुष्याश्विनिभैर्निरुक्ता यात्राशुभा सर्वदिशासु पं-
डितैः एवंविलग्नेष्वपि गंतव्यकाष्टो न्मुखेजयः दक्षिणस्थेमध्यम्·
वामस्थे हानिः पृष्ठस्थेमहाभीतिः वक्रीकेन्द्रगतः अस्यवर्गचनि
षिद्धम् जन्मराशि तनुभ्यामष्टमे चास्वारिभाद्रि गुभे तदधिपालग्न
गाश्चेत्तदारिष्ट दायात्रा बोध्या

अथस्पष्टविदिक्ष्वपिप्रदक्षिणगतासु यथाग्नेयींप्रागुक्तवार भलग्ने यथायाम्यैनिर्ऋतिदिशमेवं मन्यास्वच गच्छेत् शुभम्

दिग्लग्नानि·				
पू·	द·	प·	उ·	दि·
१ ५ ९	२ ६ १०	३ ७ ११	४ ८ १२	शुभ
२ ६ १०	३ ७ ११	४ ८ १२	१ ५ ९	मध्य·
४ ८ १२	१ ५ ९	२ ६ १०	३ ७ ११	भयं·
३ ७ ११	४ ८ १२	१ ५ ९	२ ६ १०	महाभय

अथयात्रालग्ने योगाः								
र·	चं·	भौ·	बु·	बृ·	शु·	श·	रा·	ग्रहाः
३	१०	६	४	१	५	६	६	वशीकरः
११	०	६	०	१	पृष्ठगता	३	३	जययोगः
६	८	०	०	१	०	०	०	जयकरः
२।११	२।११	२।११	२।११	२।११	२।११	२।११	२।११	जयकरः
१	७	०	२	२	२	०	०	जयकरः
२	०	०	२	०	१	०	०	जयकरः
१	१	०	०	०	०	६	६	वशीकरः
१०	०	१	१० ११	०	१० ११	१	०	वशीकरः
०	०	३ ६ ११	बली	बली	बली	बली	३ ६ ११	विजयदः
३	७	३	४	१	४	३	०	वशीकरः
११	७	३	१०	१	१०	३	६	विजय
१० ११	४	१० ११	७	१	७	१० ११	६	राजाधिराज

लग्नयोगाः

र·	चं·	भौ·	बु·	बृ·	शु·	श·	रा·	ग्रहाः
०	८	०	०	१	६	०	२	विजयः
०	७	०	४	०	४	०	०	विजयः
०	४	०	३।५	०	३ ५	०	०	विजयः
६	०	३	७	१	८	०	०	विजयः
११	१	३	१०	१	१०	३	६	विजयः
०	८	०	०	१	७	०	०	विजयः
०	७	०	४	०	४	०	०	विजयः
०	३।६ ४।१२।१२	०	वली	केंद्रे	०	०	०	धनलाभः
११	७	३	१०	१	१०	३	६	धनलाभः
६	०	६	०	३	४	३	०	धनलाभः
मेषे१	०	मकरे१	०	कर्के१	०	तुले१	०	धनलाभः
११	२	११	२	१	२	११	११	धनलाभः
०	आपो	०	०	केंद्रे·	१०	०	०	कार्यसिद्धिः
३	०	६	४	१	४	६	०	धनलाभः
३	११	६	०	१	ऽनुकू·	०	०	सर्वार्थसि·
६	०	३	७	५	८	०	०	सर्वसमृध्यै·
०	१०	०	०	कें·	०	०	०	जययो
०	०	०	०	१	वर्गोत्तम	०	०	जयः
०	७	०	४	गुरुदृष्टे	४	०	०	विजयः
०	४	०	७	०	७	०	०	जयः
०	७	०	७	०	७	०	०	विजयः
१	७	०	२	०	०	०	०	विजयः
३ ६	५ ६	६	के·	के·	के·	३·	३·	महाजयः
३ ६	०	३ ६	०	०	०	३ ६	३ ६	बलदः
३	२	०	०	०	१	०	०	जयदः

होराप्रोक्तै राज्ञांयोगैर्गंतुः सिद्धिर्भूयोभूयात् योगैः सिद्धिर्भूपतीनां

सुधिष्ण्यैर्विप्राणांस्याच्छाकुनैस्तस्करादेसन्मोहूर्त्तैः प्राकृतानामिहोक्ता सर्वेषां वैचित्तलग्नर्क्षशुद्ध्या अथयोगादेयः केंद्रत्रिकोणस्थसितज्ञजीवैर्योगोधियोगः कथितैक्यऐक्यात् क्षेमंच त्राभूद्वधजन्यहर्षः क्षेमारिबंधावनिलाभएषु एकेनयोगः फलंक्षेमं द्वाभ्यामधियोगः क्षेमोरिपूणांवधः त्रिभिर्योगाधियोगः क्षेमरिपुवधावनिलाभानि अथविजयादशमी आश्विनादिदशमीविजयायाभूमिपालगमनेविजयायविष्णुधिष्ण्यसहितायदिसास्याद्वांछितार्थसहितासुतरांस्यात् अत्रविजयाख्यमुहूर्तेयात्रासचैकादशोमुहूर्तः अथवाईषत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः विजयोनामकालोयं सर्वकार्य्यार्थसाधकः अथतिथ्यादिषुनिषिद्धेषु लग्नबलेसति दोहदबलेनगच्छेत्

तिथि दोहदं.														
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५
अर्कपत्रं.	तंडुलः	घृतं.	सक्तुकं.	हविष्यं.	स्वर्णस्पर्शो.	अपूपं.	अनारं.	कमलजलं	गोमूत्रं.	यवान्नं.	पायसं.	गुडं.	रुधिरं.	अमान्नं.

नक्षत्र दोहदं.																		
अ.	भ.	कृ.	रो.	मृ.	आ.	पु.	ति.	ऽश्ले.	म.	पू.	उ.	ह.	चि.	स्वा.	वि.	ऽनु.	ज्ये.	मू.
कुलं.	तिलं.	मत्स्यन्नं.	गोदधि.	मत्स्यन्नं.	घृतं.	दुग्धं.	मृगमांसं.	अन्नारं.	पायसं.	पक्षीद्भां.	सरङ्गा.	षष्टिक्या.	प्रियङ्गी.	अपूपमां.	तिलरसं.	आम्रफलं.	अर्कं.	मालिका.

पू.	उ.	श्र.	ध.	श.	पू.	उ.	रे.	०
शशमां	सिंहमां.	कृशरान्न	भक्त	यवपिष्ट	मत्स्यान्न	चित्रान्न	दध्योदन.	०

वारदोहदं.							
र.	चं.	भौ.	बु.	बृ.	शु.	श.	भ.
घृतखंड	पायस	कांजी	नम्रदुग्ध.	दधि.	दुग्धक.	तिलान्न	भक्ष्य.
कुंकुं.	चंदन	मृदं.	यवान्	दधि	घृतं	तैलं	चंदनं
तक्रं	चंदन	मृदं.	पुष्पं	दधि	घृतं	खिद्द	दानं धार्य्यं.
घृतं	पय	गुडं	तिलान्	दधि	यवान्	मारवान्	भक्ष्यं
प्रियंवद	शय्यास्पृ	शस्त्रधृ.	हारधृक	भस्मधृ.	यष्टिभृ.	कलही	कृत्यं.
पाटली	श्वेती	रक्ती	हरिती	पीती	चित्री	नीली	धार्य्यं.

दिग्दोहदं.								वाहनानि.				
पू.	आ.	द.	नै.	प.	वा.	उ.	ई.	दि.	पू.	द.	प.	उ.
घृत	गुडान्नं	तिलान्न	मांसक	मत्स्य	गौधूम	तिलान्न	पायस	मनुष्य	गजेन	रथेन	अश्वेन	नरेण

प्रस्थितिदि.			दिक्षु प्रस्थानदिनानि					
राजा	सामं	इतर	पू.	द.	प.	उ.	दिश	विदि
१०	७	५ ३	७	५	३	२	दिना	क्षपिमाद क्षि.

अथचेद्दोहदेषु भक्ष्यंन चेत्तदाविलोकयेत्स्पर्शनंवाकुर्य्यात्. अथप्रस्थानविधिः सुमुहूर्ते गंधाक्षतादिपूजितमुपवीतमायुधं क्षौद्रमामलकं द्रव्यं बाधारहिते देवायतनादिस्थले धनुः ५०० अथवा २०० धनुर्मितं १० धनुर्मितं गेहाद्देहांतरे प्रस्थानं संप्रस्थितोयद्गृहमंदिरतः प्रयातो गंतव्यंदिक्षुतदपिप्रयत्तेनकार्य्यम्. दुग्धं ३ दिनं क्षौरं ५ दिनं.

मैथुनं ७ दिनत्याज्यं अत्यावश्यकेऽशक्तौवा क्षौर क्रोध रोदन मांस तैल गुड मैथुनानि यात्रादिवसे त्यजेत् कृत्वाच मैथुनंरात्रौ प्रभातेयोधिगच्छति नासौफलमवाप्नोति कृच्छ्रेणापि निवर्त्तते. यावद्गर्जतिचाध्वानं यावत्कार्य्यं नसिध्यति यावद्वापि निवर्त्तेत तावद्वर्जेद्धि मैथुनम् ऋतुकाले नदोषः श्रौतविधेः प्राबल्यात् अकालवृष्टावपियात्रा निषेधः साच पौषादिमासचतुष्कभवा वृष्टिः नारदः अकालजेषु नृपति र्विद्युद्गर्जतिवृष्टिषु त्रिप्रकारे तथोत्पाते सप्तरात्रंतुनव्रजेत् गमनेशांतिं कृत्वा सूर्य्येन्द्वोर्दानंच अथगमनविधिः अथ शंखवेणु वीणा दुंदुभिनिर्घोषवर्धितोत्साहः ध्वज चामरातपत्रः सितांगरागांवरोष्णीषः संतर्प्यवह्निं हविषाद्विजांश्च गोभूहिरण्यादिभिरावृतःसन् ज्येष्टान्नमस्कृत्य कलत्रमित्रं पुत्रांश्च संतोष्य नृपः प्रयायात् नत्वेष्टदेवंस्वदिगीश्वरंच श्रद्धासमेतः सितमाल्यवस्त्रः स्वरानुरूपंविनिधायपादं वादक्षिणंचाग्रत एवयायात्- उद्धृत्यप्रथमत एवदक्षिणांघ्रिं द्वात्रिंशत्पदमभिगत्य दिश्ययानं आरोहेत्तिल घृत हेम ताम्रपात्रं दत्त्वादौ गणकवराय च प्रगच्छेत् देवगृहाद्वा गुरुसदनाद्वा स्वगृहान्मुख्य कलत्रगृहाद्वाप्राश्य हविष्यं विप्रानुमतः पश्यन् शृण्वन्मंगलमेयात् मंगलानिच पूर्णकुंभं ध्वजं छत्रं दीपंशंखंचचामरम् हिरण्यं शस्त्रमादित्यं प्राहुर्मंगलमष्टकम्- अथवारपरत्वेनस्वरमु. जी. श. र. भौ. दक्षः शुभः चंद्र. शु. श. वामः निर्गमेवामः शुभः प्रवेशेदक्षः शुभः अथावश्यके अभिजिदादौ पूर्वाह्णेनोत्तरेमध्यान्हे पूर्वतः अपरा-

र्क्षे याम्याम्=

अथशाकुनानि

मोर	चाष	नकुल	रज्जुबद्ध पशु	मांस	सद्दचः	पुष्प	गन्धा	कुंभ	छत्र	मृत्तिका	कन्या	रत्न
उष्णीष	श्वेतोक्षा	मधु	सपुत्रा	दीप्ताग्नि	आदर्श	अंजन	धौतवास	मत्स्य	घृत	सिंहासन	रोदनहीनशव	पताका
विप्राः २।३	अश्व	गज	फल	अन्न	दुग्ध	दधि	गौः	सर्षप	कमल	स्वच्छवः	वेश्या	वाद्य
०	०	०	मधु	मेष	अस्त्र	गोरोच	भारद्वाज	शिबिका	वेदशब्द	मंगलश	गीत	अंकुश

अथापशाकुनानि

०	वंध्या स्त्री	चर्म	तुष	अस्थि	सर्प	लवण	अंगार	इंधन	नपुंसक	विष्ठा	तैल	उन्मत्त
चर्बी	औषध	शत्रु	जटिल	संन्याः	तृण	कुष्टी	कुमारहीना	तैलाभ्यंग	विकोश	०	पतित	अंगहीन
क्षुधिताः	रुधिर	स्त्री पुष्प	किरला	स्वगेह दहन	ओतुयु	क्षुत	काषायी	०	तक्र	गुड	वस्त्रादिपत	पंक
विधवास्त्री	ऊष	गृहक	महिषयु	उष्णाधान्य	कपाह	रुई	०	वमन	दक्षेगर्भ	क्रोध	गर्भवती	मुंडित
आर्द्रवास	दुर्वाक्य	अंध	बधिर	रजस्व	असगो	मूषक	शूका	०	०	०	मद्यप	०

मध्यरात्रे पश्चिमांनतस्यांगारकोधिष्ठिर्नशनैश्चरजंभयं व्यती पातोन दुष्येत यस्यार्को दक्षिणेस्थितः पृष्ठतोवारविंकृत्वागच्छे द्दक्षिणतोथवा अष्टौपादाबुधेस्यान्नवधरणीसुते सप्तजीवे पदानिज्ञे यान्येकादशार्के शशिशनिभृगुजे सार्धचत्वारिपादाः तस्मिन्काले मुहूर्तः सकलगुणयुतः सर्वकार्य्यार्थसिद्धौ नास्मिन्पंचांगशुद्धिर्नचखचरबलं भाषितं गर्गमुख्यैः कृत ४ नृप १६ मुनि ७ तिथि १५ पक्ष २ द्वादश १२ रुद्रांगुलानितुप्रोक्ताः सिद्धाश्छायाः क्रमशोरव्यादिषु सर्वसिद्धिकरी अपरे रवि २० चं-१६ मं-१५ बु-१४ जी-१३ शु-१२ श-१२ एतन्मितांगुला

निशंकुमूले छायागमने घटिकैकाभिजित् तत्र सर्वकार्यसिद्धिः जातः सन् राजाव्यापारे चोत्तमासिद्धिः विवाहादिषुन औपध्यादीनांच सिद्धिः अथ शकुनापशकुनविचारः आद्येपशकुनेऽस्थित्वा प्राणानेकादश व्रजेत् द्वितीये षोडशप्राणाँस्तृतीयेन क्वचिद्व्रजेत् अत्र पूर्वोक्तो दग्ध ज्वलित धूमितादि विचारोपि शकुने मुख्यः दग्धेषु दग्धं ज्वलितं ज्वलत्सुफलं ज्वलिष्यत्यथ धूमितेषु शेषेषु शांतेषु सदा नराणां सिद्ध्यंनि कार्याणि सुखेन सम्यक् कोकिला, पल्ली, पोतकी, सूकरी, तित्तिरी, हंसी, छुंछुंदरी, खरशब्द वामे शुभाः नद्युत्तारे भये पलायने गृहादिप्रवेशे संग्रामे राजदर्शने विपरीताः शकुना शुभाः असगोह सर्प ऊड चूहा सूकर एषां यात्रासमये कीर्तनंस्वमुखे नान्यमुखेन वाकीर्तनं शुभम् नवा दर्शनश्रवणे वानररूक्षाणां नामकीर्तनं न शुभम् दर्शनश्रवणेऽशुभो भवेदिडायां परिपूरितायां सर्वोपि वामः शकुनः प्रशस्तः स्यात्पिंगलायां परिपूरितायां सर्वोप्यसव्यः शकुनः प्रशस्तः अथाद्य शकुनम् भूषा शस्त्रयुताः समान मनुजा गोःपत्ननाथेंऽगनायुक्तापूर्णघटेन शीतकिरणेश्वा ब्रह्मचारीमृगः सौम्ये शस्त्रयुतानराः क्षितिसुते देवार्चिते ब्राह्मणा शुक्रे सुंदरिबालिका हयमृगा मंदेचराः कौरवाः स्थाने वीर्य्ययुतार्कसीतकिरणादीनां वदेदादिमं पश्चादङ्गः सकुतात्प्रयाणसमये भूपादिकानां नृणाम् अथछिकाफलम् क्षुतंनिषिद्धं सर्वत्र गोक्षुतं निधनप्रदम् वामे पृष्ठे शुभमुतञ्च दक्षिणाग्रेचनो

शुभंप्रतियामंच पूर्वादौ क्रमात्क्षुतफलंविदुः विघ्नंशोकः क्षति-

दिवारात्रौच चतुर्घटिकात्मकम्								
र॰	चं॰	भौ॰	बु॰	बृ॰	शु॰	श॰	दिने	घट्यः
उ॰	अ॰	रो॰	ला॰	शु॰	च॰	का॰	दिने	३॥
च॰	का॰	उ॰	अ॰	रो॰	ला॰	शु॰	दिने	७॥
ला॰	शु॰	च॰	का	उ॰	अ॰	रो॰	दिने	११।
अ॰	रो॰	ल॰	शु॰	च॰	का॰	उ॰	दिने	१५
का॰	उ॰	अ॰	रो॰	ला॰	शु॰	च॰	दिने॰	१८॥
शु॰	च॰	का॰	ऊ॰	अ॰	रो॰	ला॰	दिने॰	२२॥
रो॰	ला॰	शु॰	च॰	का	उ॰	अ॰	दिने	२६।
उ॰	अ॰	रो॰	ला	शु॰	च	का	दिने	३०
रात्रौ	रात्रौ	रात्रौ	रात्रौ	रात्रौ	रात्रौ	रात्रौ	रात्रौ	
शु	च	का	उ	अ	रो	ला	रात्रौ	३॥
अ	रो	ला	शु	च	का	उ	रात्रौ	७॥
च	का	उ	अ	रो	ला	शु	रात्रौ	११।
रो	ला	शु	च	का	उ	अ	रात्रौ	१५
का	उ	अ	रो	ला	शु	च	रात्रौ	१८॥
भा	शु	च	का	उ	अ	रो	रात्रौ	२२॥
उ	अ	रो	ला	शु	च	का	रात्रौ	२६।
शु	च	का	उ	अ	रो	ला	रात्रौ	३०

छिक्काविचार								
पू	आ	द	नैर्ऋ.	प	वा	उ	ई	दिशाः
विघ्नः	विलंबः	उत्तमः	मृतिः	शुभं	आगमं	लाभः	शुभं	रवौ
लाभ	विलंब	मृति	लाभ	शुभ	उत्तम	अल्प	लाभं	चंद्रे
मित्रा	लाभ	विलंब	मृति.	लाभ	विदेश।	सुख	मित्रा	भौमे
सिद्धि	शारीरक	अरिष्ट	विलंब	मृति	धनना	चौरभी.	मित्रा.	बुधे
चिंतना	वार्ता	विलंब	उत्तम	चौर	मृत्तिः	कष्ट	शत्रुना.	जीवे
धनसि.	कलह	मित्राग	अर्थ	उत्तम	विलं	मरण	धनना.	शुक्रे
अर्थना.	कष्टना.	वार्ता	मित्र	उत्तम	शुभ	विलंब	मृति	शनौ.

र्लाभो भोज्यं वार्ताकलिः सुखं इंदिरामरणंसिद्धिःपीडाभोगः स्व-
खासुखे निष्फलंचोपविष्टस्यपूर्वतः क्षुतजं फलम् प्रागन्यपुंसः
परतस्तत्रैवच पुनः पुनः हृदात्त्कफाच्छिशोर्वृद्धात्क्षुतं जात वृथाज-
गुः स्वप्नस्याद्यंतयोः शस्तं क्षुतंनोभोजनाग्रतः भोजनांतेयदि भ-
वेद्भोज्यलाभः परेहनि अंतर्वत्नि कुमारीच किन्नरीमद्यकारिका
वरटीचर्मकारीचनिंद्यमासांक्षुतंसदा प्रयोजनेयत्नकृतेपिजातंक्षुतंक्ष-
णात्तद्विनिहंत्यवश्यं कार्य्योत्सुकेनापि मनागपीदं तस्मादपेक्ष्यंन
विचक्षणेन औषधे वाहनारोहे विवादे शयनाशने विद्यारंभेबी-
जवापे क्षुतं सप्तसुशोभनम् अथाश्वेंगितम् मुहुर्मुहुर्मूत्रमलं
करोति संताड्य मानोप्यनुलोमगामी अकार्यभीतोश्रुविलोचनश्च
शिवं नभर्त्तुस्तुरगोविधत्ते आरोहति क्षितिपतौ विनयोपपन्नोयात्रा

नुगोन्यतुरगंप्रतिन्हेषितश्च वक्रएवास्पृशतिदक्षिणमात्मपार्श्वं
योश्वः सभर्त्तुरचिरात्प्रतनोतिलक्ष्मीम् अथहस्तींगितम् भूमौन्य
स्तकरस्तब्धः कर्णौमुकुलितेक्षणः भीतश्चसन्गजोयानेभंगकृ-
त्स्खलितस्तथा अनुलोमगतिर्दृप्तो वक्रमुन्नम्ययातिच वल्मीक
स्थानगुल्मादिमथनःसिद्धिदोगजः अथसारमेयेंगितम् नृतुरग
करिकुंभपर्याणसक्षीरवृक्षेष्टिकासंचयछत्रशय्यासनोभूखला
नि ध्वजं चामरं शाड्वलं पुष्पितं वाप्रदेशं यदाश्वावमूत्र्याग्रतोया-
तियातुस्तदा कार्य्यसिद्धिर्भवेदार्द्रके गोमयेभिष्टभोज्यागमःशुष्क
संमूत्रणे शुष्कमन्नं गुडोमोदकावाप्तिरेवाथवा अथविषतरुकंट
कीकाष्ठपाषाणशुष्कद्रुमास्थिश्मशानानिमूत्रावहत्याश्चवायाथिनो
ग्रेसरोनिष्टमाख्यातिशय्याकुलालादिभांडान्यभक्तान्यभिन्नानि
वामूत्रयन्कन्यकादोषकृद्भुज्यमानानिचेद्दुष्टतां तद्गृहिण्यास्तथास्या
दुपानत्फलंगोस्कसंमूत्रणे वर्णजः संकरः गमनमुखमुपानहंसंप्र
गृह्योपतिष्टेद्यदास्यात्तदासिद्धरेमांसपूर्णाननर्थाप्तिरार्द्रेणचा
स्थाशुभं साग्न्यलातेन शुष्केणचास्थ्नागृहीतेनमृत्युः प्रशांतोल्मु-
केनाभिघातोथपुंसः शिरोहस्तपादादिवक्त्रे श्ववोह्यागमोवस्त्रचौ
रादिभिर्व्यापदः केचिदाहुः सवस्त्रेशुभम् प्रविशतितुगृहंसशु-
ष्कास्थिवक्त्रेप्रधानस्यतस्मिन्वधः शृंखलाशीर्णवल्लीवस्त्रादिवा-
बंधनंचोपगृह्योपतिष्ठेत् यदास्यात्तदाबंधनं लेढिपादौविधुन्वन्स्वक
र्णाउपर्य्यंकमभ्येत्यापिविघ्नायपातुर्विरोधेविरोधस्तथास्वांगकंडू
यने स्यात्स्वयं चोर्ध्वपादः सदादोषकृत् वामंजिघ्रेजानुवित्ताग-

मायस्त्रिभिः साकंविग्रहोदक्षिणंचेत् ऊरुं वामंचेंद्रियार्थोपभोगः सव्यंजिघ्रेदिष्टमित्रैर्विरोधः पादौजिघ्रेद्यायिनश्चेदयात्रां प्राहार्थाप्तिर्वांछितांनिश्चलस्य स्थानस्थस्य स्वोपानहौचेद्धिजिघ्रेत् क्षिप्रंयात्रांसारमेयः करोतिउभयोरपि जिघ्रणेहिबाव्होविज्ञेयोरिपुचौरसंप्रयोगः यानेभवंतो भयदाश्वपश्चात् अथकाकेंगितं गमनेकर्णसमश्चेत्क्षेमायनसिद्धयेभवति अभिमुखमुपैति विरुवन्विनिवर्त्तयेद्यात्राम् वामेर्वाशित्वादौदक्षिणपार्श्वेनुवाग्रतेयातुः अर्थापहारकारीतद्विपरीतोर्थसिद्धिकरः यदिवामएव विरुयात् मुहुर्मुहुर्यायिनोनुलोमगतिः अर्थस्यभवतिसिद्धो माच्यानांदक्षिणश्चैवम् वामः प्रतिलोमगतिर्वाशन्गमनस्यविघ्नकृद्भवति तत्रस्थस्यैवफलंकथयतियद्वांछितंगमनेदक्षिणविरुतं कृत्वा वामेविरुयाद्यथेप्सितावाप्तिः प्रतिवाश्यपुरोयायात् द्रुतमग्रेर्थागमोतिमहान् प्रतिवाश्यपृष्ठतो दक्षिणेनयायादद्रुतं क्षतजकर्त्ता एकचरणोर्कमीक्षन्विरुवंश्च पुरोरुधिरहेतुः

अथस्वरशास्त्रमवलंब्यकतिचिच्चक्राणि										
५	५	२	२	३	६	६	८	८	८	९
अ.	आ.	इ.	ई	उ	ऊ	ए	ऐ	ओ	औ	अं
क	ख	ग	घ	च	छ	ज	ञ	ट	ठ	ड
ढ	ण	त	थ	द	ध	न	प	फ	ब	भ
म	य	र	ल	व	श	ष	स	ह	-	-

अत्रययोर्भटयोर्जयपराजयविलोकनं तयोर्नामाक्षराणांहलामचांचयोगंकृत्वा २ द्याप्तं १ शेषेतस्यजयः शून्यशेषेतस्यपराजयः अथवायोगे ८ तष्टे- ४।६।५।७।३।१।२ शेषेत्रएग्रयोजेताभवेत् अथप्रकारांतरेण-

अथप्रकारांतरेण.										
५	३	२	४	८	६	९	७	३	०	१
अ	आ	इ	ई	उ	ऊ	ए	ऐ	ओ	औ	अं.
क	ख	ग	घ	च	छ	ज	ऊ	ट	ठ	ड
ढ	ण	त	थ	द	ध	न	प	फ	ब	भ
म	य	र	ल	व	श	ष	स	ह	-	-

अत्रापिभटयोर्नामहलचांयोगं १२ दशाहीनं ८ अष्टतष्टं यस्याधिकः शेषः सएवजेता सेनाधिपः कर्त्तव्यः यथारामरावणयोःक्रमेण र- २ आ- ३ मं- ५ अ- ५ एषां योगः १७ रावणस्य र- २ आ- ३ व- ८ अ- ५ ण- ३ अ- ५ एषांयोगः एषांयोगः २८ उभयत्र १२ हीने शेषौ ५ । ६ अष्टतष्टे राम एवजेता उभयोः समशेषत्वे संधिर्बोध्याच क्रत्रयेपिनामाझलांसर्वत्रेह शोकानां भेदोवैलक्षण्यकारकः

अथापरम्मात्राचक्रम्							
८	५	६	४	७	१	३	२
अआइ.	क.	च.	ट	त.	प.	य.	श.
ई उ ऊ	ख.	छ.	ठ	थ.	फ.	र.	ष.
ऋ२ लृ२ ए. ऐ.	ग.	ज	ड	द.	ब	ल	स.
ओ. औ	घ.	झ	ढ	ध	भ	व	ह.
अं अः	ङ	ञ	ण.	न	म		

अत्राप्युभयोः संख्यैक्ये ७ तष्टे अधिकभाक् जयीभवति पं-
चाएेडः स्वरास्ते कछढधवमुखेष्वङ्ञ व्यंजनेषु स्युर्नदादे-
स्तिथेस्ते तिथिकपि ११ लवतोप्यंतराभोगभाजः नाम्नोबालःकु
मारो युवसजरमृता स्त्वादिवर्णास्वरास्ते सिद्ध्युत्कर्षौयुवांतो
पचयइतरयोर्युध्यतांद्युएमृताचि भौमेनयोर्ज्ञशाशिनोश्चगुरो
र्भृगोस्ते क्षेत्रेशानेरुदथिनोप्यनवांशकेजात् भारे २४ करे २१
तुपरतोंतिमभानिसप्त ७ स्त्वादित्यतस्त्विन्दुमुखा अपिपंच
केषु रूपा १२ द्वेषापिहायनर्त्तुषुचते तत्काय ११ भागांतराभुक्त्या
वाच्यपरेयनेत्वइरिमौ कृष्णान्ययोः राधेभाद्रपदे सहस्यइरिषा
वाढेनभस्युर्मधौ पौषेथैरपि शुक्र उर्जउदयी माघांत्ययोरोस्तथा

अथैषामवांतरभोगचक्राणि-

द्वादशवार्षिकांतः						वार्षिकांतरभोगः					
अ·	ई·	उ·	ए·	ओ	स्व·	अ	इ	उ	ए	ओ	स्व·
१	१	१	१	१	व·	१	१	१	१	१	मा·
१	१	१	१	१	मा·	५	५	५	५	५	दि·
२	२	२	२	२	दि·	४२	४२	४२	४२	४२	घ·
४३	४३	४३	४३	४३	घ·	८	८	८	८	८	प·
३८	३८	३८	३८	३८	प·	५५	५५	५५	५५	५५	वि·

अत्रयस्योदजं तस्यत्रिवारंभोगः आदौमध्येंतेच

वर्णस्वरचक्रम्				
अ	इ	उ	ऐ	ओ
क·	ख·	ग·	घ·	च·
छ·	ज·	झ·	ट·	ठ
ड·	ढ·	त·	थ	द
ध·	न·	प·	फ·	ब·
भ·	म·	य·	र·	ल·
व·	श·	ष·	स·	ह·
नंदा	भद्रा	जया	रिक्ता	पूर्णा
मं·र·	बु·चं·	बृ·	शु·	श·
२४	२१	२१	२१	२१
रे·७	पू·५·	उ·फा·५	अनू५	अ·५
प्रभुव	नभा१२	खर१२	शोभ१२	
बाल	कुमा·	यु·वा	वृद्ध	मृत
वैभामा	आ·श्वा·श्रा·	चै·पौ	ज्ये·का·	मा·फा·

अयनचक्रमवांतरचक्र·					
अ·	ई·	अ	ई	अ·	ई
द·	उ·	कृ	शु	·कृ·	शु·
१६	१६	१६	१६	१६	दिनाः
२१	२१	२१	२१	२१	घट्यः
४८	४८	४८	४८	४८	पलाः

	ऋतुस्वरम्				
अ	ई	ऊ	ए	ओ	स्व·
७२	७२	७२	७२	७२	दिन
६	६	६	६	६	दि·
३२	३२	३२	३२	३२	घ·
४३	४३	४३	४३	४३	प·

मासांतरभोग पक्षांतरभोग दी· १घ·२१प४८					
अ	ई	ऊ	ए	ओ	स्व·
२	२	२	२	२	दि·
४३	४३	४३	४३	४३	घ·
३८	३८	३८	३८	३८	प·

अथाष्टौस्वराः नामाचः पूर्वोयः समात्रास्वरः यथारामस्यःअः नाम्नोहलचामैक्यं पंचभक्तं शेषोजीवस्वरः यथारामस्यउेः मात्रास्वरवर्णस्वरैक्यं ५ भक्तं पिंडस्वरः यथारामस्य ेः मात्रास्वरवर्ण स्वर ग्रहस्वरपिंडस्वर जीवस्वर भस्वरराशि स्वर एषांमैक्यं पंचभक्तं योगिकस्वरः यथारामस्य अकारः मात्रा[आ] च अः[१] वर्णाच[२] एः[४] महाच्च[श] पिंडाच् ओः[५] भच्चि[चित्रा] उः[३] राशेयच[तुला] एः[४] एषामैक्यं २६ पंचतष्टं शेषमेकं प्रथमोकारोयौगिकोरामस्य योगाद्द्वादशवर्षेस्युरवस्था

अथश्रीरामःस्याष्टौ स्वराः कार्याणि							
ए·	अ·	ए·	ओ·	ओ·	उ·	ए·	अ·
वर्ण	मात्रा	ग्रह	पिंड	जीव	भस्वरः	राशि	योगिकः
स·का· संग्राम	मंत्रसिद्धौ·	शुभे	सेनारचने	शुभे	शुभे	शुभे	योगभजनम्

पिंडकेब्दके भस्वरादयनेज्ञे थाराशिस्वराद्दतुस्वरे जीवान्मासस्वरेवस्था ग्रहात्पक्षस्वरेत्तथावर्णा दीनस्वरेज्ञेयामात्राचः स्याद् घटीस्वरे योगाचायोगभजनंवर्णाचा सर्वमावहेत् विषेषतस्तुसंग्रामे साहि सर्वस्वरोग्रणीः विचारश्चायंनाम्न एव बोध्यः

अत्रापिनाम्नोर्हलचांमि
तिःपंचहृता अधिकाज-
यंहीनामृतिंसाम्येसंधि
कथयति अथभूवल-
स्य सुखंजयेद्यूनिजय-
श्चघातात्स्यादाद्ययोःअं
तिमयोर्नजयः स्वशत्रुव-

जयपराजयम्				
३	१	४	२	१
अ·	ई·	उ·	ए·	ओ·
क·	ख·	ग·	घ·	च·
छ·	ज·	ऊ·	ट·	ठ·
ड·	ढ·	त·	थ·	द·
ध·	न·	प·	फ·	ब·
भ·	म·	य·	र·	ल·
व·	श·	ष·	स·	ह·

भूवलम्		
	पू· अ·	
उं·ए·	ओ·	इ·द·
	उ· प·	

लावलाभ्यां भुवमाददीत इदंचधूतेच्चतुरंगे वश्यंविचार्य्यंस्वी-
य युवस्वरवत्यांदिक्षुजयः बालकुमारवत्यां घातात्

राशिचक्रम्			रविहत			चंद्रहत दिक्		
ई· शु· २।७	पू· ११-भी	आ· श· १।११		पू· ६।७		ई २।११		आ·५।१
उ·शु·गु· १२	·	र·द· ५	उ·४।५	यामार्धम्	११८ द·			
बु· ६।३ वा·	चं· प· ४	गु· नै· ८		प· २।३		वा·६।३		९ नै·

गूढराहु

ई· ७	पू· ४	आ· १
उ· २	·	६ द
वा· ५	प· ८	नै· ३

पृष्टेर्कोयदिदक्षिणे पि पुरतः श्छायाथवा
मेजयः किंत्वर्के वहती ह्यायिनि विधौ वा-
हस्थिते स्थायिनी छायापृष्टगदक्षिणानि-
शिशशी वामेग्रतो वाजयो यातुश्चंद्रवहे प-
रस्पतुरवे र्वामः शशीष्टः क्षयी चंद्रवलम् प्राचीमुदीचींवाचं-
द्रे गतेस्थायीजयी भवेत् प्रतीचींदक्षिणां प्राप्ते यायी विजय
माप्नुयात् वायुबलम् वायुःपृष्टे दक्षिणेच वहन्सूचयतेब-

लम् संमुखीनश्चवामश्च भदानांभंगसूचकः

मोहूर्त्तिकराहुः			योगिन्यर्धप्रहरम्		
ई·१।८।१७।२५	४।१२ २।२८ पू·	७।१५ २३ आ·	ई· ८	पू· १	३ आ·
उ· २२।६ १४।३०	मोहू·	२।१० १८।२६ द·	उ· २		द· ५
३।११ १८।२७ वा·	८।१६ २४ प·	५।१३ २१।२८ नै·	व· ७	प· ६	नै· ४

मोहर्त्तिकोराहुरपियामार्धराहुरिवदक्षे पृष्ठे शुभः अर्धयाम-
योगिन्यपि दक्षे पृष्ठेशुभा दक्षेपृष्टेयोगिनीराहुयुक्ताय स्यैको-
६ शु·	६ बृ·	६ मं·	६ शु·	५ शु·	१० शु·	८ बु·	४ शु·	५ शु·	७ बृ·	६ शु·	४ बृ·	अं· ना·
८ बु·	८ बृ·	५ बृ·	६ शु·	७ श·	८ बृ·	७ बृ·	८ बु·	४ बु·	८ रु	७ बृ·	३ ३	अं· ना·
५ मं·	५ शु·	७ श·	७ बृ·	६ बु·	७ मं·	७ शु	५ बु·	५ मं·	४ श·	५ मं·	९ मं·	अं· ना·
५ श	३ मं·	६ श	४ म	६ श	२ म	२ श·	६ श·	८ म	४ श	५ श	२ श·	अं· ना

विषम त्रिंशांश सम

६	क- मे·मि·सिं·तु·ध-		वृ· क· क वृ· म· मी·
६	कुजः	६	शुक्रः
६	शनिः	६	बुधः
६	बृहः	६	जीवः
६	बुधः	६	शनिः
६	शुक्रः	६	कुजः

तत्रलग्नेग्रहान्स्थाप्य पंचाधिकारीन्यासान्कुर्यात् जन्मलग्नपतिः१अब्दलग्नपतिः२मुंथहाधिपः३त्रिराशिपतिः४दिवारविभयः रात्रौचंद्रभयः ५एषु लग्नालोकीबलवांश्चवर्षराट् तत्रमुंथानयनंगताब्देषुजन्मलग्नसंख्यां योज्य १२ तष्टे शेषराशौ मुंथाताजिकदृष्टिस्तु·

दृष्टिचक्रम्

९	५	३	११	४	१०	१	७	स्थान·
४५	४५	४०	१०	१५	१५	६०	६०	कला
मित्र	मित्र	अर्धमित्र	अर्धमित्र	अरि	अरि	क्षत	क्षत	फल·
मेलापक	मेलापक	शुभा	शुभा	क्रूर	क्रूर	कष्ट	कष्ट	नाम

ततोदशानयनं गताब्देषु स्वीयजन्मर्क्षसंख्यां द्व्यूनां योज्य ९ तष्टेक्र
मात् दशेशाः आ· चं· भौ· रा· जी· श· बु· के· शु· यो· दि· १८ ३० २१ ५४
४८ ५७ ५१ २१ ६० ग: ३६० योगिनीदशानुगताब्दे स्वीयजन्मभ-
संख्यां संयोज्य· अष्ट ८ तष्टे त्रियुक्ते शेषं योगिन्यः मं· पिं· ध· भ्रा·
भ· उ· सि· सं· अथ पताकिचक्रम् प्रवेशाब्दं नवतष्टं शेषराशौ जन्म
राशितश्चंद्रः षड्तष्टे शेषराशौ विलोमं राहुः सरलं भौमः अन्ये ग्रहा
श्चतुर्भिस्तष्टा ग्रहा बोध्याः तत्र रविविद्धे शोकः भौमविद्धे कष्टं बुध
विद्धे शुभं जीवविद्धे शुभं शुक्रविद्धे शुभं शनिविद्धे भयं राहुकेतुभ्यां
विद्धे महाभयं पताकिरचनाच रेखात्रयं पुर्वपरायतं स्यात्तन्मध्यत
श्चोत्तर याम्यभेदात् द्वाभ्यामुभाभ्यामिलिते थ तिर्यक् शृंगे भवेद्वा-
दशधा पताकी मासफलम् दिनफलंच ताजिकेभ्यो ध्येयं अत्रा-
पि पंचवर्गीत्थ शालादिकंच विस्तरतो नालेखि· अथ प्रश्नविचा-
रः तत्रादौ सामान्यविचारः यो भावः स्वामिसौम्याभ्यां दृष्टो युक्तो
यमेधते पापदृष्टयुतो नाशं मिश्रैरेवं विनिर्दिशेत् किंच ग्रहसाक-
ल्ये दृष्टेराधिक्येच फलाधिक्यं तेषां निर्बलत्वे दृष्टेरभावे फलाल्पत्व
म् अथ सिद्ध्यसिद्धिविचारः प्रश्नलग्ने शुभग्रहे शुभवर्गे शीर्षोद-
ये शुभदृष्टे कार्य्यं सिध्यति पापग्रहे पापवर्गे पृष्टोदये पापदृष्टे न सि-
ध्यति मिश्रे कष्टसिद्धिः मिश्रे बलाधिकेन सिद्ध्यासिद्धि लग्नस्वा-
मी लग्नं पश्यति कार्येषः कार्यं पश्यति लग्नेशः कार्यं कार्येशो लग्नं
लग्नेशः कार्येशं कार्येशो लग्नेशं प्रत्येकं चंद्रदृष्टौ षट्सु योगेषु संपू-
र्णसिद्धिः लग्नेशो लग्नं न पश्यति कश्चिच्छुभग्रहः पश्यति तदा पंच

विंशोपकासिद्धिः लग्नेशोलग्नंपश्यति शुभोनपश्यतितदा दशविंशोपकासि-
द्धिः शुभःस्वामिश्चपश्यतस्तदापंचदशविश्वोसिद्धिः त्रयः शुभाः पश्यं-
तितदासप्तदशविंशोपकंचत्वारः शुभालग्नपश्च पश्यतितदापूर्णं
कार्य्यंक्रूरेक्षण हीनंचेत् अथ पुत्र पुत्रीप्रश्नः लग्नेशपंचमेशौय
दि पुंराशौ पुंवर्गस्थस्तदापुत्रः समवर्गे तदाकन्या विषमराशिगोजीव
सूर्यौपुत्रदौसमराशिगाश्चंद्रकुजभृगवस्तदाकन्याभृगुचंद्रौपंचमौ
कन्यातावेवयत्रकुत्रापिस्थित्वापंचमालोकवंतौपुत्रः तावेवानीचा
स्तमितौ लाभेपुत्रः लग्नसुतलाभेषुसौम्ययुतेषुदशमगुरौपुत्रः द-
क्षस्वरे पुत्रः वामे कन्या लग्नाद्विषमभावगशनौपुत्रः समभागश
नौकन्या लग्नंविनाचरेराशौ विषमे पुत्रकृच्छ्रनिः समेस्त्रीराहु
रप्येवं जातनाशकरोहिंसः नारीपितृगृहेपृच्छतितदापितृगृहना-
माक्षराणि भर्तृगृहेभर्तृनामाक्षराणि तेषु शुक्लादितिथिसंख्यांयो-
ज्य त्रिभिर्भागेन एकशेषेपुत्रः द्विशेषे कन्या शून्ये शून्यं गर्भमास
पृच्छालग्नभुक्तनवांशैर्भुक्तामासाः भोग्यनवांशैर्भोग्या लग्नाद्यतम
स्थाने शुक्रस्तावतोमासाः शेषः दशमादिषु शुक्रे पंचमाद्गणनाश्च
थवा प्रश्नकालीनचंद्रद्वादशांशाकराशिगतेचंद्रे प्रश्नकालीनलग्न
नवांशतुल्यवेलायां प्रसवोवाच्यः इदंच सर्वमनुपातेन यथोक्तक-
रणेन पलादिकंचेष्टं निरंतरमायातिगर्भे किंभविष्यति विषमवर्गे
स्वामि शुभयुग्दृष्टे पुंग्रहदृष्टेपुत्रः अन्यथाकन्या. ममसंततिर्भवि-
ष्यति. लग्नेशः पंचमे पंचमेशोलग्ने तत्र वर्षेसुतोद्भवः तावुभावष्टम
गौयावद्ग्रहयुतौ तावतांनशः पुत्रेशो राहुकुजाभ्यां युतः पुत्रहात

स्मिन्राहु कुजमध्यगेपापाक्रांतेस्तेनिर्बले पि शनिरुच्चो भ्युदि
तोबुधशुक्र चंद्रयुतेक्षितोदिव्यपुत्रदः बलीशुभः पंचमगः पुत्रः
दः क्रूरजितस्स एव तन्नाशदः पंचमेरवियोगे दृष्टौ वैकः पुत्रः भौ-
मेनत्रयः गुरुणापंच सोमेनकन्याद्वयं बु धेन कन्याचतुष्कं भृगौ
कन्याषट्कं शनौकन्यासप्तकं शुभदृष्टौ जीवन मन्यथा न वृषसिं
हकन्यावृश्चिकराशयो लग्नचंद्राभ्यांपंचमगा अल्प संतति दाः
यदिस्वर्क्ष गैसूर्यशनीचंद्रबुधौवारंध्रगौ स्तस्तदा स्त्री वंध्या-
गुरुभृगुरंध्र गौमृतप्रजा कुजेरंध्रगेस्रवद्गर्भा हित्वा धनुर्द्धे ग-
गतैः शशांकमाहेयचंद्रात्मजदैत्यपुत्रैः अग्रे स्त्रिशूलं प्रसव-
श्चपश्चादग्रेणपश्चाच्च धनुर्धरस्थैः सूर्य भृगू रंध्र गौपापावित्तस्फ
तव्ययगावाप्रथमसंततिर्म्रियते ऽन्याजीवति बुधगुरु भृगुभिः
स्वराशिभिर्लग्नसुतजाया धर्मलाभगैः पापहीनैर्धनीपुत्रः दक्षि-
णकुक्षिगेगर्भेपिप्रायः पुत्रः वामगेकन्या मध्योदरे षंढःकुक्षिः
द्वयगेयमलं एवमेव गोमहिष्यादिषु अथ यमल योगः पंच-
मस्थितं ग्रहयुग्मंसर्वग्रहैर्दृश्यतेचेन्मिथुनं प्रश्नलग्ने चत्वारिग्र-
हयुग्मानिचेत्संति तदायुग्मप्रसवः मित्रेणसह प्रीतिर्भविष्य-
तिवा लग्नेश लाभेशयोरित्थशालेमिथः स्नेहदृष्टौ वा लग्नेशोला-
भगे लाभेशोलग्नगे वामैत्रीस्यादीशराफेन ॥ अथैतदुप योगि-
नौ मुथशीलमूसरिष्यो ॥ शीघ्रेल्पांशके मंदे बह्वंशके पूर्वोक्त
ताजिकदृष्टौचदीप्तांशांतरेपिमंदे इत्थशालो भवति विलोमे
मूसरिफः त्रिधावस्थोयंभवति पूर्णवर्तमान भविष्य भेदात्-

कलादि हीने पूर्णः दीप्तांशांतरे वर्तमानः शीघ्रेंन्यलवे मंदेन्यरा-
शौभविष्यः उभयोः शुभस्वर्क्षतुंगगयोर्यथोक्तफलदः दीप्तां
शास्तक्रमाद्रव्यादीनां र.१५ चं.१२ भौ८ बु.९ शु.७ श७ रो-
गी जीविष्यति.था शुभे सु१।४।७।१०।५।९ जीवनं निर्बल
लग्नयतावष्टमपतौबलिनिमरणंचंद्रे६।८ मृतिः लाभेशः शुभो
क्षितो लग्नेश उदितोमृत्युपोदुर्बलस्तदाजीवनं लग्नलाभेशलाभे-
षु बलवत्सुजीवनं रोगनाशश्च मृत्युपतौ केंद्रगेवालग्नेशे६।८
नष्टे वा चंद्रे च निर्बलेमरणं पापकर्त्तरिभेचंद्रे केंद्रगेवामृतिः
पृष्ठोदये लग्ने तुर्य्येक्रूरविद्धेमृतिः चरराशौलग्नगेषष्टगेवाकें
द्रे च सौम्ययुते जीवनं शुभेषुलग्नसुतगेषुवाचंद्रे उपचयगेपि
३।६।१०।११ शुभेषुकेंद्राष्टवित्तगेषुजीवनं॥ अथलाभः॥

चंद्र लग्नेश लाभेशालग्नवित्तत्रिकोणगाः दृष्टिमंतोमिथःप्र-
ष्टुर्नितरांलाभदायकाः सौम्याः केंद्रत्रिकोणगालाभदाःपापास्तत्र
गाविघ्नदाः सौम्याउच्चगालग्नवित्तदशमगानवमगृहंशुभदृष्टंचे-
ल्लाभः शुभेनवमे गुरौलग्ने रवौदशमेलाभः शुभेसप्तमायगतेपिपूर्णे
चंद्रोलाभगतःसौम्यस्तुंगोधनेपिवा शुभोवालाभगस्तुंगे लाभदस्त
त्क्षणे नृणां लग्नेशेलग्नेलाभे लाभेशेसप्तमेशेउदितेलाभः चंद्रशु-
क्रबुधानामेकोपिलाभेशेक्षितोलाभेचेल्लाभोभूयात् उच्चेशुक्रे न्य-
स्मिन्वागृहेलग्नतुर्यलाभगेलाभः चरेलग्नेशुभैर्युतेलाभः नवमेशुभ
दृष्टेप्येवं लाभेलाभेशचंद्रेणत्रिकोणस्थग्रहैर्वावीक्षितेलाभः सौ-
म्याः कोणेपापाउपचयेलाभः सौम्याउपचयेपापाकोणेहानिः गुरु

लग्ने भृगुः सप्तमे चंद्रस्तुर्ये सप्तमे वा सद्यो लाभः लग्नतृतीयदशमायगाः शुभा लाभः लग्नेशलाभेशयोः सर्वग्रहाणां वा लाभे दृष्टिर्लाभदा लग्नेशधर्मेशौ शुभदृष्टियुतौ लग्नेशो वा चंद्रर्क्षगः कोणे लाभदः चंद्रो लग्नपतिर्वापि धनपत्याग्रतो यदि तदान धनलाभः स्याद्विपरीतो हि लाभदः धनेशो लग्ने लग्नेशो वा धने शुक्रेंदुगुरु धनेशो वा धने भूरि लाभः लाभे लाभेशसंदृष्टे लाभे शुक्रे गुरौ विधौ लाभो भवति भाग्ये वा धने वा चंद्रयोगतः ॥ अथ नष्टलाभः ॥ एकादशं विचार्यं पुष्टचंद्रे लाभभवने वा शुभयुतेक्षिते नष्टं लभ्यते लग्नद्विपंचतुर्यायगतेषु शुभेषु लाभः क्रूरेषु तत्र त्येषु न लाभः लग्नेशे शुभेक्षितयुते लाभः क्रूरयुते न लग्नेशसप्तमेशयोगे कष्टाल्लाभः सप्तमेशे लग्नेशसहिते लग्नगे लाभः लग्नेशे सप्तमगे न लाभः सशुभे पूर्णचंद्रे द्वितीयतुर्यगे लाभः सार्के चंद्रे सप्तमगे न लाभः सप्तमेश्वरे वक्रेपि न लाभः चंद्रक्रूरयुतेपि न मेषालिकन्याकर्कराशयः शुभवीक्षिता दशमगा लाभः जीवादष्टमगः सौम्यो नष्टप्रश्ने न्यधिष्ण्यगे शीघ्रं नष्टस्य लाभः स्याद्दीसे रवेटे विशेषतः पतितधनलाभप्रश्नः धनेशलग्नेशचंद्राणामित्थशाले तेषां सप्तमस्थे वा लग्नग धनेशस्य धनगेत्थशाले वा लभ्यते लग्नद्विपंचतुर्यसूर्यचंद्रयोर्वा तुर्याद धःस्थत्वे वा सूर्य दृष्टे वा न लाभः जीवेन भृगुणा वा दृष्टे पूर्णचंद्रे लग्नगे वा बलवति शुभग्रहे लाभमुपयाते वाद्भुतं नष्टलाभः शुभदृष्टे शीर्षोदये लग्ने वा लाभः ॥ चौरहृतिप्रश्नः॥ सौम्याः केंद्रोपचयवित्तगा लाभाय पापास्तत्र स्थिता हान्यै पूर्णेंदुज्ञजीवभृगूणामेकोपि लग्नगो लाभः

चंद्रोयत्रतिष्ठतितद्भवनंस्वामिनादृष्टंचेल्लाभः लग्नेशोसप्तमगेसप्तमे-
शोलग्नगेलाभः उभौसप्तमेमुथशीलिनौलाभः तौलग्नेमुथशीलि-
नौ चौरः स्वयमागत्यार्थं प्रयच्छति सूर्ये लग्नगे चंद्रे स-
प्तमगे न लभ्यम् कर्मेशलग्नेशयोरित्थशालेचौरःपलायते सप्त
मेशेकेंद्रे चौरोन्यत्रगतोनहि गतास्त्रि धर्मस्वामिभ्यामित्थशालिनिस
प्तपेलग्नेशसप्तमपयोर्मिथोलग्नेचदृष्टथभावेनिर्बले वालग्नपेचौरेरा
ज्ञेर्थमर्पयेत् दशमेशलग्नेशयोरित्थशाले राजतो धनंनलभ्यं लग्ने-
शदशमेशयोरित्थ शालेस्वल्पोलाभः लग्नचंद्रयोः शुभयोगेक्षणा-
ल्लाभः धनेशरंध्रेशेत्थशालेलाभः तयोरित्थशाले लग्नेशदशमेशयो-
र्दृष्टौचौरधनं राजागृहीत्वा चौरंचबध्नाति रंध्रेशकर्मेशेत्थशालेनृपश्चौ-
रसाहाय्यकृत् धनेशे सूर्यप्रविष्टेचौरश्चाप्तः उदितेधनेशेकिंचिद्दद्या
त् प्रश्नकालेचंद्रेक्रूरक्षेत्रगेचौरहृतंवाच्यं अथचंद्रे सौम्ययुतेऽयुते
वानचौरहृतं चंद्रेस्तपेवास्तंगतेचौरो धनंच नलभ्यते ॥ लग्नाच्चौरज्ञा-
नं ॥ मेषेद्विजः वृषेक्षत्रियः मिथुनेवैश्यः कर्केशूद्रः सिंहेंत्यजः कं-
न्यायांस्त्री तुलेपुत्रभ्रात्रादि वृश्चिकेसेवकः धनुषिभ्रातृपत्नीवा म-
करे वैश्या कुंभे मूषकः मीनेभूतलं ॥ दिग्ज्ञानं ॥ लग्नेचंद्रेप्राचि
तुर्येउदीची सप्तमेप्रतिची दशमेवाच्यां स्थिरवर्गेवर्गोत्तमेगतंन त-
त्रैवास्थितं स्वकीयश्चौरः तत्रप्रथम दृक्काणेद्वारे द्वितीयेगृहमध्ये
तृतीयेगृहपश्चिमे बलाढ्यात्केंद्रगाद्दिग्वाच्या प्रागादिनाथाः श्चा-
शु मं रा श चं बु बृ केंद्रेग्रहाभावे लग्नराशितोदिक् १।५।९
प्राक् २।६।१० दक्षिण ३।७।११ प्रत्यक् ४।८।१२ उदक्

विवादप्रश्ने ॥ लग्नपेमंदगतौ बलवति केंद्रगते वादीजयति स-
प्तमपेता दृशोसति प्रतिवादी मंदेशस्य चंद्रलग्नेशाभ्यांमित्रदृशेत्थ
शाले शीघ्रंवादशांतिः लग्नेशसप्तमेशयोर्योवक्रः ससभायांदुर्ब-
लः अनयोर्योदशमेशदृष्टोयोवासूर्येत्थशालीयो वास्वोच्चगः केंद्र
पेनेत्थशालि नृपतिस्तत् पक्षपूरकः स्यात् शनौदशमेशेबलिनिकें
द्रगे कुजदृष्टे भौमे दशमस्थे न्यायो नपूर्य्येत प्रत्युतदंडमादद्याद्राजा
गुरौ भृगौवातथासति धर्म्योन्यायः बुधेदशमगे मिश्रितन्यायः सूर्येद-
शमस्थे सदंडः चंद्रेसशुभे दशमस्थे शुभोन्यायः लग्नपचंद्रयोर्दश
मेशेनेशराफे दीर्घोझकटकः अनीचास्तेक्रूरलग्नेवादीनोजयतिसप्त
मगे प्रतिवादिनोजयः उभयत्रक्रूरेन कलहनिवृत्तिः परंतयोः क्रूरयो
र्योबलवान्भाविसइतरंनेष्यति लग्नसप्तमव्यतिरिक्तभवनस्थयोः क्रूर-
योर्मिथो दृष्टौपूर्णायां सत्यांवादिप्रतिवादिनौ छुरिकाभ्यांप्रहरबंदी
मोक्षे मृत्युयोगेमोक्षः शुभयोगेन अष्टमेशेकंठकस्थे यावद्धर्षनमोक्षणं
वित्तयेतुर्यगेदीर्घबंधः बलीचंद्रोगुरुर्वालग्नेशसहितोबंधदः कर्कंविना
चंद्रोमोक्षदः स्थिरेचंद्रेलग्नेचबंधः चंद्रेव्ययगेमोक्षः अस्तंगतेलग्नेशेच
चतुर्थगेमरणदः लग्नपस्यकेंद्रपेनेत्थशाले लग्नेशकेंद्रपतिषुकेंद्रगेषुन
मोक्षः शुभानांकंबुले शुभैरित्थशाले वालग्नेशचंद्रयोः शुभसहितत्वेवा-
चिरात् लग्नेशेआपोक्लिमस्थे द्वादशेशेपापदृष्टेनमोक्षः लग्नपरंध्रेशयोरि
त्थशालेचतुर्थभवनेजातेमरणं चंद्रस्यपापैरष्टमेशेनेत्थशालेवाचतुर्थ
भवनेमृतिः लग्नचंद्रौचरस्थौशीघ्रंमोक्षः चंद्रेकर्केचिरान्मोक्षः मकरेगेपि
चंद्रेचिरान्मोक्षः स्थिरेचंद्रेचिरान्मोक्षः द्विःस्वभावेद्रुतं परंयदिबंधन-

कालेनचंद्रमाङ्गिस्वभावगः लग्नस्यचंद्रस्यवातृतीयभवनधर्मस्थग्रहेण
तृतीयधर्मपतिनावासह तृतीयभवनमध्ये इत्थशाले व्ययेशलग्नेशाभ्यां
दशमभवने इत्थशालेवा नवमलग्न पतिभ्यां तृतीयभवनेवेत्थशालेवास्क
स्वेनमोक्षः चंद्रेशनिभौमयुतेक्षितेकेंद्रगेबंधनताडनदुःखानि सप्तम
शुभः शुभं दृष्ट्वा लग्नपंपश्येत्तदायेनबद्धः सएवमोचयेत् लग्नेशेत्रिनवमगे
त्रिनवम पाभ्यामित्थशालिनिवास्वयंमोक्षः केंद्रवर्जं गुरुभस्थेचंद्रेसौम्य
स्वराशिगेनच दृष्टे सुखंमोक्षःसप्तमेशेशुभक्षिते नवमस्थेसुखंलग्नेशः सप्त
मपंसुदृष्ट्यापश्येद्राजान्यायंकुर्यात् अरिदृष्ट्या अन्यायं॥ अथवृष्टिप्रश्ने
॥ चरेशोषः स्थिरे २४ दिनोत्तरंवृष्टिः कर्कमीनकन्यानामन्यतमराशौ दश-
मे पूर्णचंद्रे गुरुभृगुबुधयुते भूरिजलं जलराशौलग्ने द्वित्रिगेवावृष्टिः लग्ने-
शो द्वित्रिगः सशुभः २७ दिनोत्तरं पूर्वतो वृष्टिः २।४।७।८।१०।११।१२ जल
चरराशयः शेषाः शुष्काः शुक्रविधूजलग्रहौ भौमशनिसूर्याः शुष्काः बुध
गुरू मिश्रौ शुभेक्षितयुतेजलराशौलग्नगेचंद्रे भृगौवाकेन्द्रकोणगेवासौम्याः
जलराशिगेषुद्वित्रिकेंद्रस्थेषु शुक्लेचपक्षेसुवृष्टिः सौम्यास्तुर्यगावृष्ट्यै पा-
पादुर्भिक्षदाःसुखेचंद्रभौमभृगुलग्नगेषुवृष्टिः चंद्रभौमशनिष्वपिचन्द्रभौमसू-
र्येषुदुर्भिक्षं आर्द्रस्पर्शेजलार्थमुद्यमः जलेसमीपोपवेशनंपानीयंशदोच्चा
रो वृष्टिशकुनानि चंद्रार्काभ्यां ७ शुक्रशनी वृष्ट्यैलग्नात् ४।८।२।३ शुक्रश-
नीवृष्टिदौ॥ दूरस्थोजीवतिमृतोवा॥ लग्नेशेचन्द्रेवा ४।६।८ नीचगेवास्तेवा
छिद्रपेनेत्थशाले वामृतः शुभैरदृष्टेचंद्रेवक्रगेनेत्थशालेभौमेदशमगेमृतः
निर्बलाः सौम्याः षडष्टव्ययगाः सूर्यचंद्रौ शुभेक्षितौ सपापौमृतिः सपापेषष्ठोद-
येलग्ने पापाः केन्द्रकोणाष्टव्ययगाः सौम्या दृष्टामृतिप्रदाः सूर्येनवमगेज्वरा
र्तः तुर्योपरिस्थेनवमे नचंद्रमायादीत्थशालंकुरुते शुभेक्षितः सौम्यैर्युतोवा पः

रदेशसंस्थितः सुखीचजीवत्यथसौख्यमेतिसपापेशुभैरयुतदृष्टेवानवमगेरो
गीतस्मिन्नष्टमगेमरणम्॥ अथमुष्टिप्रश्नः॥ प्रश्नकालेयदिकोपिग्रहःस्वांश-
स्थोयदिलग्नत्रिकोणेष्वन्यतरंस्वांशंपश्यतितदाधातुर्वाच्यः अथयदिस्वयं
परांशस्थतत्रैव१।५।९वर्तमानंस्वांशंपश्यतितदाजीवःपरांशस्थःस्वयंतत्रापि
वर्तमानंपरांपश्यतिचेत्तदामूलंओजराशौलग्नगेधात्वाद्योनवांशकगणनया
समराशौलग्नगेजीवमूलधातवोनवांशकवशात्तत्रापिपापांशेधाम्यो धातुः
सौम्यांशेधाम्यःमिथुनतुलांगनाकुंभचापपूर्वार्धेषुजीवाद्विपदास्तेषांदेवन
रपक्षिणोभेदाः मेषवृषसिंहचापांत्यभागेषुचतुष्पदाः कर्कालिवृषमीनाः स-
रिसृपाः तत्रापिमीनोद्विपात् शेषाबहुपदाः कर्कमकरमीनेषुमूलंजलजेषुज-
लजं इतरेषुस्थलजंबलिनौकेंद्रोपगतौरविभौमौधातुकारकौप्रश्नेबुधचंद्रौ
मूलकरौशनिगुरुशुक्रास्तथाजीवं अपरंचऊर्ध्वंपश्यतिजीवंमध्यंपश्यति
धातुं अधः पश्यतिमूलं ऊर्ध्वांगंस्पृशन् जीवमध्यांगंधातुं अ-
धोगंमूलं जीवबुधौजीवम् रविशुक्रौमूलं इतरेषु धातुंयद्राशीन-
वांशेबुधस्तद्राशेर्यायोनिः सैवचिंतनं लग्नेशेबलवतिस्वात्मचिंता
एवंतत्तद्भावेशेषबलिषुतत्तद्भावानांचिंतनं ॥ अथकयासुरतं॥
शुक्रभौमरविषुसप्तमेषु अन्यांगनयाजीवे स्वयाशशिज्ञयोर्वे-
श्ययाशनौसंकरजया आकृतिवयोवर्णादिकंचंद्रइव अथवा
लग्नांशाधिपतिलग्नेशांशपत्योमिथोमित्रदृष्टौदेहसमं एवंयद्य-
द्भावेशेनसहमैत्रीचंद्रदृष्टिचतत्तद्भावेस्यवृद्धिः अथवालग्नांश
कमेवलग्नंप्रकल्प्य ग्रहानपिअंशकगतानेवस्थापयित्वाधातु
मूलादिकं कथयेत अथवाप्रश्नाक्षरंषड्गुणितमष्टभिर्युतंसप्त-

तष्टं शेषे धातुमूलादिकं बोध्यं अथवा एकविंशाक्षरं जीवं धातुवर्णा स्त्रयोदश एकादशाक्षरं मूलं अधिके चिंतनं मतं तत्रचक्रम्.

जीवाक्षरादिः		
जीवाक्षराः	धात्वक्षराः	मूलाक्षराः
अ. आ. इ. ए. ओ. अः क. ख. ग. घ. च. छ. ज. ञ. ट. ठ. ड. ढ. य. श. ह. २१	उ. ऊ. अं. त. थ. द. ध. प. फ. ब. भ. व. स. १३	ई. ऐ. औ. ङ. ञ. ण. न. म. र. ल. ष. ११

सभागतप्रश्नकर्तुर्मुखात्फलनामाक्षरेषु शेषामधिक्यं तांचिंतां जानीयात्.

उत्तरोत्तरादि			
उत्तरोत्तरं	अधराधां	उत्तराधरं	अधरोत्तरं
उत्तरस्वर मक्षरंच	अधरस्वर मक्षरंच	अन्यतमे.	अन्यतमे.
शुभं	नाशः	शुभमध्यः	अधम शुभ.
क. ग. च. ज. ट. ड. त. द. प. ब. य. ल. श. स. अ. इ. उ. ए. अं. उत्तराः			
ख. घ. छ. ऋ. ठ. ढ. थ. ध. फ. भ. र. व. ष. ह. आ. ई. ऊ. ऐ. अः अधराः			

उत्तराधरादिकः

१	२	३	४	५
अ. ए. क. च. ट. त. प श	आ. ए. ख. छ. ट. थ. फ ख	इ. ओ. ग ज. ङ. द. ब. ल स	ई. औ. घ. ऋ ठ. ध. भ. व. ह.	उ. ऊ. ङ. ञ. ण. न. म. अं. अः
शुभाः	मध्याः	शुभमध्याः	मध्यशुभाः	अशुभाः
उत्तर	अधर	उत्तराधरः	अधरोत्तरः	दग्धः

अष्टौ पक्षाः							
संयुक्त	असंयुक्तः	अनाभि	अभिहित	अभिधा	आलिं	अभिधू	दग्धः
आदि तृतीयौः	तुर्यपंचमावुपरित्रधःप्रथमं	आदिद्वितीयौ	आद्यमधोद्वितीयाऊर्ध्वं	आद्यमूर्ध्वमधोद्वितीयं	ह्रस्वस्वरै	दीर्घस्वरै ह्रस्वस्वरै	उ.ऊ.अं.अङ ञ.ण. न.म.
शुभं	दोषदं	शुभं	शत्रुवर्धकं	शुभं	शुभं	मध्यं	अशुभः

द्विचतुर्थौमित्रे तृतीयपंचमौशत्रू संयुक्तेन शुभंसर्वं असंयुक्ते नमध्य-मं अभिहिते स्वल्पलाभः स्यान्मरणं चाभि धूमिते अन भिहतेचवि ज्ञेया आद्यंते दुःखसंपदः आलिंगिते शुभंसर्वं कृछ्रसौख्यंच धू-मितेदग्धेविनश्यते सर्वपक्षाष्टानांविनिर्णयः

शुभाशुभं					
अ. ए.	आ. ए.	इ. ओ.	ई. औ	उ.ऊ.अं.अः	स्वराः
प्रथमाक्षराः	द्वितीय	तृतीय	चतुर्थ	पंचमाः	वर्णा
वर्तुलाः	दीर्घा	चतुष्कोण	त्रिकोण	गोलाः	आकारः
शुक्ला	कृष्णा	रक्ताःसछिद्र	नीला	बहुवर्णा	वर्ण
दिन	रात्रि	दिन	रात्रि	दिन	दिनरात्रि
पूर्व	दक्षिणा	पश्चिम	उत्तरा	पूर्व	दिश
पुत्र	कन्या	पुत्र	कन्या	षंडः	पुत्रादि
स्वग्राम	परग्राम	स्वग्राम	चपलभिश्र	स्वग्रा.	ग्रामा.
शुभ	दुष्ट	शुभ	भयदा	शुभ	शुभा
लाभ	अलाभ	लाभ	वामनआला.	लाभ	लाभा.
गृहजाः	वन्या	गृहजाः	दूरगाः	गृहजा	ग्राम्याः

गर्गमनोरमोक्तं

अ.२	आ.३	इ.४	ई.५	उ.६	ऊ.७	ऋ.८	ॠ.९	ऌ.१०	ॡ.११	ए.१२	ऐ.१३	
ओ१४	औ१५	अं१६	अः१७	क.३	ख.४	ग.५	घ.६	ङ.७	च.४	छ.५	ज.६	
झ ७	ञ ८	ट ५	ठ ६	ड ७	ढ ८	ण ९	त ६	थ ७	द ८	ध ९	न१०	
प ७	फ ८	ब.९	भ १०	म ११	य ८	र ९	ल १०	व ११	श ९	ष १०	स ११	ह १२

श्रीरामोक्तचक्रम्

श्रीराम	स्थानलाभः
सीता	धनं
लक्ष्मण	कार्यसिद्धि
बिभीषण	सर्वलाभ.
कुंभकर्ण	मरणम्
रावण	तक्षय
अंगद	राज्यम्
सुग्रीव	बंधुलाभ
केकई	कार्यनाश
भरत	अभिषेक
अर्जुन	कल्याणं
सुलक्ष्मण	कार्यना.
हनुमान	कार्यसिद्धि
जाम्बवान्	दीर्घायुः
नारदः	कलहः
गुहः	प्रियदर्शन
देषा	फलानि.

वर्गवर्णप्रमाणेन सस्वरं ताडितं मिथः पिंडसंज्ञाभवेत्तस्य यथा भागैस्तु कल्पना सिध्यसिद्धीक्रमात् द्वाभ्यां लाभालाभौ जयाजयौ धातुर्मूलं तथाजीवं जीवं मूलं च धातुकं कालाक्रमायुगणाज्ज्ञेयं गुरुपादसेवयेति संकीर्णकल्लोल.१६॥ वर्षशुभाशुभज्ञानं ॥ मेष संक्रांति लग्नेशो मेषसंक्रांत्यनंतरामापूर्णिमान्यतर प्रवेशलग्नेशो विलग्नगो केंद्रगो शुभदृष्टौ शुभेत्थंशालिनौ सकलवत्सरसुखदौ पापार्दितभयं पापैरित्थशालै केंद्रभवनेषुजाते पापदृष्टियोगे महर्घगदश्च अथ जन्मलग्नात् प्रतिवर्षे शुभाशुभं जन्मोदयाद्वादशदज्ज प्रवेशेलग्नं हि यद्भावगतं शुभान्वितं तद्भाव वृद्धिं प्रकरोति तस्मिन्वर्षे नृणां पापयुतं तदन्यथा १ १ देहसुख २ धनलाभ ३ कुटुंबवृद्धि ४ मित्रसुख ५ पुत्राप्ति ६ श

त्रुपराजय ७ स्त्रीसुखं ८ मृत्युभयं ९ धर्मलाभं १० स्थानलाभ ११ लाभाधिक्य १२ दुःखदरिद्रपापयुतौ नत्तद्भावहाः कूपादिवाहनं ऋक्षेषूत्तरपौष्णवैष्णव मघामूलानुराधाश्विनी प्राजापत्यकरद्विदैवतगुरोशीतांशुदेवेषुच निर्दोषैर्वृषभद्वयैश्चसुमनो मालाभिरामालितैर्दत्वाक्षेत्रपतेर्बलिंहलधरः क्षेत्रंततःकर्षयेत् ॥ चंद्रस्यशृंगोन्नतिफलं ॥ मीनमेषगतश्चंद्रोभवेद्याम्योन्नतः सदा समशृंगोवृषेकुंभे शेषभेषूत्तरेन्नतः याम्योन्नतेच दुर्भिक्षं समं स्याच्चसमेविधौ सुभिक्षंसौम्यदिग्भागेचोन्नतेमृगलांछने मूलाकारेविधौभीतिः प्रोदितेमहतिरुजः ॥ चंद्रस्योदयफलं ॥ बृहदभ्युदितेचंद्रेभवेत्धान्यसमर्धना धन्येतन्महर्धत्वं समेतत्समतामता यदिशुक्लद्वितीयायां वामेचंद्रोदयो रवेः शुभंतदाखिलेमासिनोशुभं दक्षिणोदये ॥ अथप्रतिमासेदर्शफलं॥ शुभवारान्वितेदर्शेस्यात्सुभिक्षंप्रजासुखं पाप वारान्वितेदुःखं तथा धान्यमहर्धता अथैकमासेपंचवासरफलम् शुक्लादिमासेचेत्पंच पापखेटस्यवासराः प्रजापीडाभवेत्तत्र धान्यस्यापिमहर्घतामासे पंच शुभावारा यद्येकस्मिन्प्रजायते सुभिक्षंसर्वशस्यानांतदासर्वेसुखीजनाः पंचके रविवाराणां छत्रभंगोमहाभयं सोमे धान्यसमृद्धिश्च सुखं भवतिसर्वदा भौमेरक्तभयंघोरं छत्रभंगस्तुवाभवेत् बुधेसुभिक्षंसौख्यंच जीवे शुक्रेपितत्समं पंचकेसूर्यपुत्रस्य पाताले कंपतेफणी ईशानदेशभंगश्च वन्हिदाहोमहर्घता अथाषाढपूर्णिमायां वायुपरीक्षां ॥ आषाढे पूर्णिमायांच प्रदोषेवादिवानिशं प्राच्यां वायोस्तुवृष्टिःस्या त्धान्यनिष्पत्तिरुत्तमा अल्पवृष्टिःस्तथाग्नेय्या मग्नेभीतिर्महर्घ-

ता अनावृष्टिर्भवेद्याम्यां प्रजापीडामहर्घता दुर्भिक्षंरौरवं घोरं मनावृ
ष्टिश्च नैरृतौ वारुण्यांच महावृष्टिर्धान्योत्पत्तिश्च मध्यमा वायौवा युः
प्रचंडश्च वृष्टिर्धान्यंचमध्यमं बहुधान्यंसुवृष्टिश्च उत्तरस्यां सुखीजनाः
ईशान्यांशस्यसंपत्तिर्धनाढ्याःसुखिनोजनाः ॥ संवत्सरात्सुभिक्षादि ॥
त्रिघ्नेसंवत्सरेयुक्ते शरैर्भक्ते थसप्तभिः चतुर्द्वाभ्यांमितेशेषे सुभिक्षंविपु-
लंभवेत् त्रिपंचके चदुर्भिक्षंषड्भूसंख्येचमध्यमं शून्येतुरौरवंज्ञेयंफ-
लंवर्षेबुधैःस्मृतम् अथवा द्विघ्नःसंवत्सरोरामैर्हीनो भक्तोनगैस्ततः
शेषेवाणमितेयुग्मे सुभिक्षंहायनेभवेत् वेदचंद्रमिते ज्ञेयं दुर्भिक्षं खे-
तुरौरवं ॥ अथ भूकंपफलम् ॥ भूकंपो यामतोवर्णक्रमाद्गण्यादिवा
निशं वायुमंडलजोभूप शस्यांबुमगधंतथा ग्रामान्नमुदकं वन्हिमंडल
स्थोनिहंतिहि इंद्रमंडलजोभूमिं तथागुर्जरदेशकं भूपालांश्चीनदेशा
श्च प्रचेतो मंडलोद्भवः ॥ इंद्रमंडल ॥ ज्येष्ठानुराधारोहिण्यो धनिष्ठा
श्रवणंतथा अभिजिदुत्तराषाढा शुभंमाहेंद्रमडलं यद्यत्रचलतेकिं-
चिद्विकारंवायदाभवेत् माहेंद्रं तद्विजानीयात्तस्यवक्ष्यामिलक्षणम्
प्रजा प्रहृष्टाः सर्वाःस्युः सर्वरोगविवर्जिताः संधिंकुर्वंतिराजानः सु
भिक्षंभवतिध्रुवं उपभुंक्ते नृपःसौख्यं हृष्टाभूमिर्नचेतयः निर्भयाग
दितालोका उत्पाते भूमिमंडले ॥ वारुणमंडलं ॥ आर्द्राश्लेषाशत
भिषक् पूर्वाषाढाचरेवती मूलमुत्तरभद्राच वारुणंमंडलं स्मृतं बहुदुग्ध
युतागावो बहुपुष्पफलद्रुमाः आरोग्यं जायतेक्षोण्या मुत्पातेजलत
त्वजेउत्तिष्ठंतिमहामेघाविद्युन्ताडितकुंडलाः ॥ अग्निमंडलं ॥ भर-
णीकृत्तिकापुष्योविशाखापूर्वफाल्गुनी पूर्वाभाद्रमघाचेतिआग्ने-

यमशुभंमतंधनक्षयोभयंघोरंपीडारोगोल्पनीरता अम्यारव्यमं-डलोत्पाते फलपुष्पादितुच्छता यद्यत्रचलतभूमिः परिवेषेंदुसूर्य-योः भूमिकंपो थनिर्घात उल्कावापतितायदि ग्रहणंचंद्रसूर्याणां केतोरुत्पातदर्शनं रक्तवृष्टिः पांशुवृष्टिः पाषाणपतनंतथा आग्ने-यं तद्विजानीयात्तस्यवक्ष्यामिलक्षणं अल्पक्षीरास्तथागावोऽल्प स्पुष्पफलद्रुमाः शस्यानांनाशनंचैव अनावृष्टिंविनिर्दिशेत् कपाल हस्ताहृश्यंते क्षुधयापीडितानराः ॥ वायव्यमंडलम् ॥ चित्रास्वाति मृगाश्विन्यः पुनर्वसुकरोतथा उत्तराफाल्गुनीचैव वायव्यमशुभावहं यद्यत्रचलतेवायुरन्यह्लातंमहाभयं वायव्यंतद्विजानीयात्तस्यवक्ष्या मिलक्षणं महावातंतथाभीतिर्महाभयमुपस्थितं उत्पन्नाहितथामेधा नमुंचंतिजलांजलिं ॥ अथकाकनीडफलं ॥ काकनीडंयस्यांशाखायां वृक्षस्य तस्यफलं ॥ काकमैथुनं ॥ दिवावायदिवारात्रौ यःपश्येत्का कमैथुनं सनरोमृत्युमाप्नोति ह्यथावास्थान नाशनं

नीडचक्रम्										
पू:	आ:	द:	नै:	प:	वा:	उ:	ई	मध्ये	वल्मीक भूमि	शुष्कवृक्षे
सुभिक्षंक्षेममारोग्यं सुवृष्टि र्भवेत्	हाहाकारं महारौद्रं विग्रहंच समादिशे	हाहाकारं महारौद्रं विग्र हंच	सामान्याफलं द्वौमासौवर्षतेमेघदु-र्भिक्षं	वृष्ट्यभावोभवेत्	वायव्ये वायुभयं करोति	पुराणंविक्रयेधान्यं सुभिक्षं	स्वल्पोदकास्तदामेघाकृषिश्चशुष्य ति	अनावृष्टि	महाचौर भयं अवृष्टि	चौरभयंराजभयं विग्रहंच

अस्यदोषस्योपशांतये शांतिः एवंकपोतेपिक दव्यांहितालायामपिच-

काकशब्दविचार								
पू.	आ.	द.	नै.	प.	वा.	उ.	ई.	दिश
आग्निभीति	वर्षा	सिद्धि	इष्टाग.	शुभ	क्षेमावा.	इष्टा.ग	मनोरमा	प्रहरे १
इष्टागम	राजशोकं	इष्टागम	कैरव	इष्टागम	शोकं	इष्टवार्ता.	अध्यगा	२ प्रहर
आग्निभीः	शुभवा.	इष्टागम	शुभला	धनलाभ	इष्टलाभ	संतुष्टि	शुभ	३ प्रहर
इशुभवा.	यात्रा.	सिद्धि	संतोष	चिंता	मनोरथ	धननाश	उद्वेग	४ प्रहर

दिनमिछायारवचंद्र सहिता दिनमध्यरुच्याहीनातयाशरहता दिनमानघट्यः भक्तास्तदा भवंति वासरयातगम्यनाडीप्रमाणम नुनाथविलग्नमस्मात छायापादे रसोपेते रेकविंशच्छतं भजेत लब्धांके घटिका ज्ञेयाः शेषांके चपला स्मृताः त्र्यंगुलं तृणमादाय छाया राम समन्विता चतुःषष्टिं भजेत्तेन लब्धानाड्यः

छायापादोपरीष्टकालः																								
[illegible]	मकरादि	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३
		१८	१६	१४	१२	१२	११	१०	९	७	८	८	७	७	६	६	६	६	६	५	५	५	५	४
		३१	२४	५४	३०	१२	१३	४१	५८	४८	३२	०	४६	७	५०	४२	३६	२८	१२	४२	१६	१२	०	४८
[illegible]	कर्कादि ६	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३
		१६	१५	१३	१२	११	१०	९	९	८	८	८	७	७	६	६	६	५	५	५	४	४	४	४
		५२	०	१५	३०	९	५४	१७	०	५२	३१	०	०	६	४८	१७	९	५८	४२	०	४२	३१	२४	०

सप्तनाडी							
शनि	रवि	भौ	जी	शु॰	बु॰	चंद्र	स्वामि
कृ॰	रो॰	मृ॰	आ॰	पु॰	ति॰	अ॰	भानि
वि॰	स्वा॰	चि॰	ह॰	उ॰	पू॰	म॰	भानि
अनु॰	ज्ये॰	मू॰	पू॰	उ॰	ऽभि॰	श्र॰	भानि
भ॰	अ॰	रे॰	उ॰	पू॰	श॰	ध॰	भानि
उर्ध्वा	उर्ध्वा	उर्ध्वा	मध्य	०	०	०	०
चंडा	वाता	दहता	सौम्य	नीर	जल	ऽमृत	नाम
याम्या	याम्या	याम्या	मध्य	उत्तर	उत्तर	उत्तर	नाम

स्मृताबुधैः अथ सप्तां गुलशंकु ध्रुवकाः चैत्रे माधवआश्विने १४४ कृतमनुमार्गेयमौसप्तभू १७२ ऊर्जेफाल्गुनकेवियद्गजविधुः १८० पौषेच नेत्रौधृति १८२ ज्येष्ठेश्रावणभाद्रयोः कृततिथि १५४ स्त्वाषाढकेत्रिमनुः १४३ माघेवाणधृतिश्च १८५ सर्वगणकैशंकुः सुसप्तांगुलं सप्तांगुल तृणछायायुताः सप्तभिरंगुलैःतत्तन्मासध्रुवोभाज्यो लब्धं घट्यादिकंस्फुटम् एकविंशत्यंगुल तृणछाया सर्वतृणे भवेत् तावत् घट्यादिकं मध्यमार्गेस्थितासौम्या नाडितस्याग्रपृष्ठगाः सौम्ययाम्यगतं ज्ञेयं नाडिकानांत्रिकंत्रिकं क्रूरयाम्यगतानाड्यः सौम्यासौम्यदिगाश्रिताः मध्यनाडीच मध्यस्था ग्रहरूपफलप्रदाः एकनाडीगताश्चा-प्याग्रहाःक्रूराशुभायदि ततोनानाफलं वाच्यंशुभंवायदि वाशुभं ग्रहाःकुर्युर्महावातंमहावाताख्यनाडिकां गतानाडीगतावायुं वह्न्यां दाहगायदि सौम्यनाडिगतामध्या नीरस्थामेघवाहकाः जलायां वृष्टिदाश्चंडा नाडिकास्तेतिवृष्टिदा एकोप्येतत्फलं धत्ते विनाडीसं-स्थितोग्रहः भूसुतः सर्वनाडीषु धत्तेनाडिफलंध्रुवं प्रावृट्कालेसमा-

यातेरौद्राद्यर्क्षगतेरवौ नाडीवेधसमायोगे जलयोगान्वदाम्यहं यत्र नाडीस्थितश्चंद्रः तत्रस्थः खेचरोयदि क्रूर सौम्यबिमिश्रश्चतद्दिने वृष्टि रुत्तमा एव मृक्षाद्रा सयोगो जायतेयदिखेचरैः तत्रकाले महावृष्टि- र्यावत्तस्यांशकेशशी केवलैः सौम्य पापैर्वा ग्रहैर्बद्धे यदाशशीतदा ति तुच्छ पानीयं दुर्दिनं भवतिध्रुवं यस्यग्रहस्यनाडिस्थश्चंद्रमात द्ग्रहेणच दृष्टोयुक्तः करोत्यंबु यदिक्षीणोनजायते पीयूष नाडिग श्चंद्र स्तत्रखेटाः शुभाशुभाः त्रिचतुः पंचपानीयं दिनान्येकत्रिसप्त- कं एवंजलाख्य नाडिस्थे चन्द्रे मिश्रग्रहान्विते दिनार्ध दिवसंपंच दिनानिजायतेजलं अमृतादित्रयेयत्र भवंति सर्व खेचराः तत्रवृष्टिः क्रमाज् ज्ञेया धृत्यर्क रसवासराः १ ।१२।६ सौम्यनाडीगतास- र्वे वृष्टिदास्तुदिनत्रयं शेष नाडिमहावातं दुष्टवृष्टिप्रदाग्रहाः नि- र्जला जलदानाडी भवेद्योगेशुभाधिके क्रूराधिक समायोगे जलदा ह्यंबुदायकाः सौम्यनाडीगताक्रूरा अनावृष्टिप्रसूचकाः शुभयुक्ता जलांशस्था अतिवृष्टिप्रदाग्रहाः एकराशिगतावेतौ चंद्रमा धरणी सुतौ यदितत्रगतोजीवः करोत्येकार्णवांमहीं चलत्यंगारके वृष्टि स्त्रिधावृष्टिः शनैश्चरे अंबुपूर्णांमहींकृत्वा पश्चात्संचलते गुरुः शु- क्रेचास्तमयेवृष्टि रुदयेचबृहस्पतौ सूर्यस्यपुरतोगच्छे द्यदाशुक्रो बृहस्पतिः वर्षाकालेनसंदेह स्तदावृष्टिर्निरंतरा उभौतुगच्छत- स्तदापूर्णयोगः पूर्वात्रयेतथाश्विन्यां हस्तेत्वाष्ट्रेथवायवे वारुणे मैत्ररेवत्यो र्भौमास्तिष्ठतिवर्षति व्रजतियदिकुजः पतंगपृष्टेघट मिवभिन्नजलं तदाददाति अथ भवतिदिवाकराग्रगश्चेत्प्रलयघ-

नानपिशोषयत्यवश्यं चित्रास्वातिविशाखासु यस्मिन्मासे नवर्षति तस्मिन्मास्यजलाभे धाइतिगर्गोमुनिर्जगौ उदयास्तमयेमार्गे वक्रयुक्तौचसंक्रमे जलनाडिगताःखेटामहावृष्टिप्रदायकाः विरसमुदकं गोनेत्राभंवियद्विमलादिशो विमलविकृतिःकाकांडाभंयदाच भवेन्नभः पवननिगमतोभूयं तेरूषाःस्थलगामिनो रसनमसकृन्मंडूकानां जलागमहेतवः

अथपल्लीपातफलं ॥ पादयोर्जघने जान्वोर्गुदे गुह्येच मृत्युदा अन्यत्र शुभदा प्रोक्ता सचैलं स्नानमाचरेत् पल्याप्रयतते चैव शरटस्याधिरोहिणे यत्रोक्तंहिमनुष्यस्य शुभाशुभनिदर्शकं स्त्रीणांतुतद्व्यत्यासा त्वबोध्यंबुद्धिमतासदा तिलमाषादिदानंच स्नात्वादेयंद्विजन्मने अशुभध्वस्त्यै मृत्युंजयजपस्वर्ण गोदानं ॥ अथात्रविशेषः ॥ पल्याःपतनशरटारोहणे फलंवक्ष्यमाणं

मुद्रालये वायव्यां वरमन्न वस्त्रमतुलं सौम्येर्थलाभो ध्रुवं ईशान्यां

पल्ली फलम्									
मस्तके	ललाटे	कर्णयोः	नेत्रयोः	नसोः	ओष्ठे	कपोलः	हनौ	ग्रीवा:	कंठे
राज्यं	स्थानलाभ	भूषणं	प्रियदर्शी	कलहो	मिष्टान्न	सौख्यं	भयं	विग्रहं	पापं
स्कंधे	दक्षपृष्ठे	वा.पृष्ठे	दक्षांसे	वामांसे	दक्षभुजे	दकूर्पे	दक्षमणौ	द.करतले	दक्षकरपृष्ठे
कलि	सुखं	रोगः	जयः	मृत्युः	लाभ	उग्रं	लाभ	भयं	व्यथा:
वा.भु.	वा.कं.	वा.म.	वा.क.ते.	वा.क.पृ.	हृदये	द.स्तने	द.भागे	वा.स्तने	वामभा:
धननाश	धननाश	धनना:	धनना:	धननाश	राजमा:	सौभाग्यं	भोगः	यशोहानिः	क्रीडा
वा.कुक्षौ	द.कुक्षौ	उदरे	द.कट्यां	वा.कट्यां	नाभौ	बस्तौ	गुह्ये	गुदे	द.ऊरौ
बालपीडा	पुत्रलाभ	पुत्रलाभः	धनलाभ	पुत्रनाश	मनोरथ	पुत्रनाश	मृत्युः	रोगः	प्रीतिः
०	वामकुक्षौ	द.जानुः	वामजानु	द.जघने	वामजघने	वा.जंघा:	द.जंघा	दस्फिजे	वास्फिज:
०	मृत्युः	सुखं	पशुहानि	सुखं	कष्टं	क्लेशः	कुसुमं	धनं	स्त्रीवियोग
०	द.गुल्फे	वा.गुल्फे:	पादयोः	पुरोमार्गे	पृष्ठतः	धाम	दक्षे	परितो भ्रमणं	०
०	मित्रागमः	उपद्रव	गमनं	उद्वार्ता	इष्टवार्ता:	हानिः	छत्रं	ख्याति	०

गृह गोधिकार्थ जननिन्नासंवधः शब्दिता शांतिस्तु प्रति रुपदेयं॥ अथस्वप्नविचारः॥ आद्ययामेनिशिस्वप्नो वर्षेणफलदोभवेत् द्वितीयेमासषट्केन तृतीयेत्रिभिर्मासकैः प्रातः सद्यः फल स्वप्नस्ततः स्वथान्नचेन्नरः रोगचिंतोद्भवाश्चर्थाश्चिरपाकाहि वीक्ष्यतां॥ अथ शुभस्वप्नाः॥ सद्राजा ब्राह्मणोदेवाः सिद्ध गंधर्व किन्नराः गुरुश्चेतांवरानारी तेषामाशीश्चदर्शनं प्रासाद राजशैलानां श्वेतोक्षास

नवाजिनांदर्शनंरोहणं लाभः सिंहस्यारोहणंतथा छत्रध्वज सुव-
र्णा व्र रत्नरौप्यदधीनिच यवगोधूमसिद्धार्थाः फलंदीपश्च कन्य-
का श्रीखंडाक्षतदूर्वेक्षुदर्पणंपुष्पितद्रुमाः लाभेवादर्शनेचैषां ला-
भसौख्यंभवेद्यशः भोजनंरोदनंवीणा वादनंरोदनंतथा अगम्या
गमनंविष्टा लेपनं शस्तमीरितं आरूढो योहिजागर्त्ति पुष्पितंफ-
लितंद्रुमं दष्टःश्वेताहिनादक्षे करेस्यात्समहाधनः रुधिरस्नानपा-
नंच सर्पदंशो मृतिर्निजा शय्याहर्म्यसिनानांच ज्वलनस्यशिरश्छिदः
रक्तश्रावोजलस्नानं मरणंमांसभक्षणं सुरायःपयसःपानं प्रश-
स्तं पायसाशनं कदलीकल्पवृक्षश्च तीर्थंगंगादिकं सरित् तोरणं
भूषणंराज्यं तथामंदिरसन्निभं वेदवाद्यादिनिर्घोषो गर्त्तोनिःसरणं
तथा दंशोवृश्चिककीटानां तडागोद्यानदर्शनं १० पीतंरक्तफलंपुष्पंस्व
प्नेप्राप्नोतियस्यच लभते सोचिरात्स्वर्णपद्मरागमणिंतथा जयोद्यू-
ते रणेवादे पुरुहूतध्वजेक्षणं आत्मनो बंधनंशीर्षं बाह्वोर्भूषणमु-
त्तमं अभिषेक करोविप्रो देवोवाछत्रधारणं कुरुते महिषीव्याघ्री
गोसिंह स्तन्यपानकं कदली तृण वृक्षाश्च पुष्पाणामुद्भवस्तथा
भवोभूमि धरस्यापिक्रमणोत्क्षेपणे शुभे मणिसौवर्णरौप्याणांपा-
त्रेवा भोजने तले योऽश्नाति पायसं स्वप्ने सराज्यमधिगछति गो-
र्लिंगी ब्राह्मणोराजा पितामित्रेचदेवता यद्वदेत्सदसत्स्वप्नेतत्तथैव
प्रजायते पूजितंशिवलिंगंच देवतावायथाविधिः स्वप्नेदृष्टाप्रय-
छंति नराणां विपुलंधनं त्यक्त्वा तक्राणि कार्पासं श्वेतवर्णं शुभंमतं
सर्वं कृष्णमसद्धित्वा गोदेवांश्च गजद्विजान् १८ अथाऽशुभस्वप्नाः

वस्त्राणि जंघयोर्वधवंधनं गमनंवामपादेतु दक्षिणेस्थानलाभकृत्
दक्षिणांगंशुभं पुंसां वामांगंयोषितां तथा नेत्रस्याधःस्फुरणमशकृ
त्संगरेभंगहेतुर्नेत्रस्योर्ध्वहरतिसकलंमानसंदुःखजालं नेत्रस्यांते
कथयतिसुखंनासिकांतेचमृत्युश्चैतत्सर्वंफलमविफलंवैपरीत्यंच
वामे ॥ अथोत्पाताः तेचत्रिविधादिव्यभौमांतरिक्षभेदात् प्रकृतेरन्य-
त्र उत्पातः दिव्यं ग्रहर्क्षवैकृत उल्कानिर्घातपवनपरिवेषाः गंधर्वपु-
र पुरंदरचापादियदंतरिक्षंस्यात् भौमंचरस्थिरभवंतत्रप्रतिमावैकृ
तं अग्निवैकृतं वृक्षवैकृतं शस्यवैकृतं वृष्टिवैकृतं नदीवैकृतं प्रस-
ववैकृतं चतुष्पदवैकृतं वायव्यवैकृतं मृगपक्ष्यादिवैकृतं शक्रध्व-
जेंद्रकीलादिवैकृतं केतुदर्शनं प्रतिसूर्यपरिवेषरजःधूमेरात्रौधनु
र्दिवा उल्कातारा चैवदिने तथारात्रौच धूम्रकेतुश्चभूकंपश्चतथावहिः
एतानिदुष्टचिन्हानि देशक्षयकारीणिच शांतयो भेदात्ऋतुपरत्वेनानु-
त्पाताश्चबोध्याः ॥ युगानामुत्पत्ति ॥ कलिर्भाद्रपदेमासे माघेवैद्वा
पुरस्मृतः त्रेताप्रवृत्तिर्वैशाखे कृतादिःकार्तिके तथा॥ गजछाया॥
कृष्णपक्षेत्रयोदश्यां मघाविंदौकरेरवौ यदातदा गजछाया श्राद्धेपु-
ण्यैरवाप्यते। ॥ अर्धोदयः ॥ अमार्कपातश्रवणैःयुक्ताश्चेत्पौषमा
घयोः अर्धोदयः सविज्ञेयो कोटिसूर्यग्रहाधिकः अथ नक्षत्रपाद
परत्वे कष्टावलिः अश्विन्यांचभवेद्रोगो ह्यामवातस्तथाज्वरः वातश्ले-
ष्मतथाशोषं पीडाभवतिदारुणा नंदारुद्रादिशोविंश ९।११।१०।२०
दिनसंख्यामिमांशृणु अश्विनौदेवताचास्य मृत्युंजयजपादिकं जपः
पंचसहस्राणि अहोरात्रंच होमयेत् ब्राह्मणान्भोजयेच्चैव दानंदत्वासु-

खीभवेत् देवते अश्विनौ तत्र द्विभुजौ शुक्लवर्णकौ सुधाकलशसंयुतौ कमंडलुधरौ शुभौ भरण्यांच यदारोगश्छर्दिरोगश्च जायते ज्वरं तंद्रां महारोगं नरोरोगैः प्रपीड्यते शून्याशिचत्वारिंशच्च रुद्राणि ०।८०।४० ११ दिनसंख्यया भरणी यमदैवत्यं यमायत्वेति मंत्रतः नमंत्रं नौषधं तस्यनचदानं जपादिकं जपंकुर्वीतगायत्र्या अयुतंसंख्यया तथा छायादानं प्रकुर्वीत शर्कराज्यंच पूरकं अजाच महिषीदानं गोदानं तुरगं तथा ब्राह्मणान्भोजयेत्तत्र क्षेत्रपालंच पूजयेत् यमस्तु देवता तत्र कृष्णवर्णो द्विबाहुकः लुलायवाहनः श्रीमान्पाशदंडधरः प्रभुः२ कृत्तिकायांभवेद्रोगो रक्तनेत्रं प्रदृश्यते चक्षुःपीडाभवेत्तस्यज्वरशूलं तथैवच अतिदाहं महाकष्टं ज्वरंतीव्रंच दारुणं ग्रहशांतिं प्रकुर्वीत दानं ब्राह्मणभोजनं दिनसंख्याभवेत्तस्य नवैकादश षोडश ९।११।१६।२८ अष्टाविंशतिकंचैव दानं दत्वा सुखी भवेत् कृत्तिका अग्निदैवत्यं तिलाज्यं जुहुयात्तथा अग्निमूर्धेति मंत्रेण जाप्यमेक सहस्रकं अग्निस्तु देवता तत्र रक्तवर्णोजवाहनः चतुर्भुजो घृताम-त्रस्रुवस्रुक् वरदाभयः३ रोहिण्यां मस्तकेशूलं ज्वरंपीडाच दारुणा प्रलापंविक्षतीश्चैव कुक्षिशूलंच दृश्यते दिनानि सप्तनवभिरष्टादशचत्रिंशकं ७।९।१८।३० प्राजापत्यंहिदैवत्यं ब्रह्मयज्ञेतिमंत्रतः सहस्रंतत्कृतंजाप्यं होमयेद्दधिपायसं दधितंडुलदानंच सवत्सांगां तथैवच अष्टौविप्रास्तथाभोज्याः कुलदेव्याश्च पूजनं रक्तवर्णश्चतुर्बाहु हंसारूढश्चतुर्मुखः पद्माक्षसूत्रवरदाभयहस्तोनिरामयः ५ आर्द्रायांव्याधिरुत्पन्नो ग्रहपीडाच दारुणा शिरपीडास्वदेह-

स्य नमंत्रंनचभेषजं वर्जयेत्सप्तरात्राणि म्रियतेनात्रसंशयः शून्य मष्टादशंचैवशून्यंचैवचतुःशून्यकं ०।१८।०।० रुद्रोपिदेवतातस्य नमस्ते रुद्रमंत्रत अयुतंचजपंकुर्यान्मध्वाज्यानिच होमयेत् कृषिर्भूमिःप्रदातव्या कृष्णवस्तूनि दापयेत् रुद्रोहि देवतातत्र वृषारूढश्चतुर्भुजः त्रिशूल खड्गवरदाभयहस्तः प्रकीर्तितः ६ पुनर्वसौभवेत्पीडाकटीपीडाच जायते सप्तश्चतुर्दशश्चैव युगंचैकविंशति ७।१४।२।२१ अदितिर्देवतातत्र अदिती इतिमंत्रकं शतमेकं कृतंजाप्यं घृततंडुल होमयेत् सुवर्णकमलंदानं कौमारीपंचभोजयेत् चतुर्भुजापीतवर्णा साक्षसूत्रकमंडलुः वरदाभयहस्तासा साक्षसूत्र कमंडलुः पुष्येच व्याधिजेचैव ज्वरपीडाचदारुणा शूलपीडाचातिकालं व्याधिंघोरंतथैवच सप्तसप्ततथाविंशदेकविंशस्तथैवच ७।७।२०।२१ बृहस्पतिर्देवतास्य कथितोमुनिसत्तमैः बृहस्पतेतिमंत्रेण शतानांपंचकंजपं घृतपायस होमैश्च होमयेत्तद्दशांशतः चतुर्भुजः पीतवर्णो देवतास्य बृहस्पतिः दंडाक्षसूत्रपाणिस्तु साभयःसकमंडलुः आश्लेषायांगदोत्पन्ना चौषधंतन्नदृश्यते कुलमातृश्चयोगिन्यो बलिदानंचदापयेत् छायापात्रंचदातव्यं मुच्यतेनात्रसंशयः शून्यंशून्यंचैकवेदास्तदग्रेशून्यमेवहि०।०।४१।० सर्पोधिदेवतातत्र नमोस्तुसर्पेतिमंत्रकं अयुतंजपंच कुर्वीत कासारघृतहोमयेत् दातव्यंतत्रदानंच सवत्सांगांच नीलिकां सर्पस्तुदेवतातत्र महामंडलरूपधृक् सुविस्तृतशिरश्चंडोमधुपिंगललोचनः ९ मघायांचेद्भवेपीडा गात्रार्धे शीतलंतथा तिथिः सप्तसप्तदश विंशतिश्चैवमानतः १५।७।१७।२० पितरोदेवताचास्य

पितृभ्यइतिमंत्रकं शतमेकंकृतंजाप्यं तिलतंडुलहोमयेत् तिलमाष
सवस्त्राणिदानंदत्वासुखीभवेत् पितरोदेवतास्तत्र कृष्णवर्णाश्चतुर्भु-
जाः रुद्राक्षसूत्रभयदाः कमंडलुधराशुभाः १० पूर्वाफाल्गुनिकेपीडा
भवेदर्धशिरोव्यथा पीड्यतेसर्वगात्राणि तनुपीडामहाभयं संख्याशू-
न्यंतिथिश्चैवशून्यंत्रिंशद्दिनानिच ०।१५।०।३० भगोहिदेवताचास्य
भगप्राणेतिमंत्रकं अयुतंजपकुर्वीत प्रियंगुंजुहुयात्तिलाः पित्तलंचै-
वगोदानं माषान्नंचसुवर्णकं पूर्वाफाल्गुनिकायांचभागोऽदेवःप्रकी-
र्तितः रक्तवर्णोबुजासीनो द्विभुजोभयपद्मकः ११ उत्तराफाल्गुनोव्या-
धिर्भवेत्पीडायदातदा शरीरं व्यथते तस्य शिरोरोगं तथैवच सप्तश्च
तुर्दशश्चैव सप्तषष्टिःतथैवच ७।१४।७।६० अर्यमादेवताचास्य दे-
वध्वे इतिमंत्रकं द्विःसहस्त्रकृतंजाप्यं तिलाज्यं होमयेत्ततः हिरण्यंच
कृतं दानं मन्नदानं तथैवच अर्यमादेवतापद्ममध्यस्थःपद्मवर्णकः
पद्माभयकरः श्रीमान् स्वर्णमूर्तिर्महाद्युतिः हस्तेपीडाचसर्वांगे उ-
दरेशूलदारुणं त्रुटयंते सर्वगात्राणि प्रस्वेदं बहुजायते पंचदश
सप्तदश तिथिशून्यंतथैवच १५।१७।१५।० सविता देवताचास्य उ-
दित्यमितिमंत्रकं सहस्त्रमेकंसंजाप्यं दधिसर्पिश्च होमयेत् र-
क्तवस्त्रस्यदानंच धेनुंदद्यात्तपस्विनीं सविता देवता अस्यसप्ता-
स्वरथवाहनः द्विभुजो रक्तवर्णस्यात्पद्मासनसमाश्रयः १३ चि-
त्रायां जायते व्याधिर्विचित्रं कष्टदारुणं रुद्राग्रहाः स्वगाश्चैव
षोडशैवक्रमादमी ११।९।९।१६ त्वष्टातुदेवताचास्यत्वष्टुरीये-
तिमंत्रकं जाप्यं पंचसहस्त्रंतु तिलतंडुलहोमयेत् विचित्रवृषभं

दध्या गुडं तैलं तथैवच त्वष्टापद्मास्थितश्चित्र वर्णस्यात्सचतुर्भुजः प-
द्मसूत्राक्षवलयः पद्माभयकरप्रभुः स्वात्यामुत्पद्यते पीडा बहुरोगंच
दृश्यते ग्रहहोमंच कर्तव्यं तथानक्षत्रमंत्रकं षष्टिः सप्तदशात्रिंशा दंवरं-
च तथानृणां ६०।१७।३०।० जपंपंचसहस्त्रंतु तिलाज्यंयवहोमयेत
वायुश्चदेवताऽस्य वायोरग्निति मंत्रकं आरक्तागौश्चदातव्या स्व-
र्णंचयथाविधिः वायुश्चदेवतातत्र मृगारूढश्चमेचकः गदाचर्मधरः
श्रीमान् द्विभुजः परिकीर्तितः १५ विशाखायां कुक्षिशूलं सर्वगात्रस्य
पीडनं तिथिखंवेद वन्हींदुर्नामतश्च दिनावधिः इंद्राग्निदेवताज्ञेया इं-
द्राग्नीइतिमंत्रकं द्विसहस्रं कृतंजाप्यं दध्योदन होमनं रक्तपीतं सु-
वस्त्रंतु वृषभं कृष्णदानकं इंद्राग्नी देवतेतत्र गजा जा वाहनौमतौ
चतुर्बाहु रक्तवर्णौ निजशस्त्रौ धरौतथा १६ अनुराधाभवोरोगो ज्व-
रं तीव्रं महाभयं षष्टिर्द्वादश षट्त्रिंशत्तथात्रिंशत्प्रकीर्तिता ६०।१२
३६।३० मित्रोपिदेवताचास्य नमो मित्रेति मंत्रकं जाप्यंसहस्त्रमे-
कंतु यवाज्यं होमयेत्ततः अन्नं हिरण्ययुक्तंच छायादानं तथैवच
चापांकुशाभयैर्युक्ता तथासमविराजिता पद्मासनोरक्तवर्णोमि-
त्रस्तस्यांतु देवता पद्माभयकः श्रीमान्द्वि भुजः परिकीर्तितः १७ ज्ये-
ष्टायांचभवेद्रोगः पित्तंच बहुपीडनं कंदतेव्याधितःसोपि आकुलं
व्याकुलं तथा नवपंचदिनान्येव ग्रहाश्चांगास्तथाब्धयः ५९।९।४६
इंद्रोपिदेवताचास्य त्रातामंत्रेतिमंत्रकं तैलं वस्त्रंच दातव्यं तत्क्षणा-
त्क्लेशनाशनं शक्र ऐरावतारूढो दिव्यसिंहासनेविभुः श्वेतवर्णोवज्र
धरोभयपाणिर्महाभुजः १८ मूलायांचभवेद्रोगो ज्वरः शूलंप्रपीडयेत्-

सन्निपातंमहाव्याधिं जीवितस्यापिसंशयः शून्यंनंदंतिथिश्चैवषड्दि
नानिइतिक्रमात् ०।९।१५।६ निर्ऋतिर्देवताचास्यमातापुत्रेतिमं-
त्रकं जपंपंचसहस्राणिकंदमूलानिहोमयेत् कृष्णगोदानकंचैवस-
प्तधान्यंसुवर्णकं छायादानंचान्नदानंस्वर्णदानंविशेषतःनिर्ऋति-
र्देवतातत्रश्वेतारूढश्चमेचकः खड्गखेटकधारीचद्विभुजःपरिकी-
र्तितः १९ पूर्वाषाढेभवोव्याधिनानाव्याधिप्रपीडनं शिरोरोगंमहा
रोगंकंपितक्रंदितोनरः शून्यंपंचदशश्चैवचतुर्विंशतिमंदश ०।१५।२४
१०। आपोपिदेवताचास्य आपोधर्मेतिमंत्रकं द्विसहस्रंकृतंजाप्यंस
तिलंयवहोमयेत् जलकुंभसहस्राणि स्वर्णदानंचदीयते आपस्तुदेव-
तास्तस्य शुक्लवर्णःशुभाकृतिः वरुणस्तुजलस्वामी स्वामीपूज्यस्तु
नामतः मकरे वाहनेविष्टो भवेत्पद्मकरोध्रुवं२० उत्तराषाढकेरोगेक-
टीपीडाचदारुणा प्रलापः कंदनंचैव उदरेशूलमेवच त्रिंशच्चैवचतु-
र्विंशत्षड्विंशत्षोडशस्तथा ३०।२४।२६।१६ विश्वेचदेवताचास्यवि-
श्वेदमितिमंत्रकं जपमेकसहस्रंतु तिलाज्यं यवहोमयेत् ब्राह्मणा-
न्भोजयेत्तत्र हिरण्यंदीयतेततः विश्वेदेवा देवताश्च श्वेतवर्णाश्चतुर्भु-
जाः वरदाभयहस्ताश्च साक्षसूत्रांबुजासनाः श्रवणेच यदारोगं वात
पित्तंकफोद्भवं विह्वलंचातिसारंच सर्वगात्रंप्रपीडयेत् षष्टिश्चैवच-
चतुर्विंशत्षड्कं नवतथैवच ६०।२४।६।९ गोविंदो देवताचास्य वि-
ष्णोरराडितिमंत्रकं अयुतंजपकुर्वीत तिलाज्यं यव होमयेत् गोदा-
नं स्वर्णदानंच ब्राह्मणान्भोजयेत्ततः विष्णुस्तुकृष्णवर्णः स्यात्सन्नगात्रा-
न वाहनः शंखचक्र गदापाणिःपीतवासाचतुर्भुजः २२ धनिष्ठायां

भवेत्कष्टं मूत्रकृच्छ्रेणपीडयेत् ज्वरंरक्तमतीसारंक्रंदतेचमुहुर्मुहुः ति
थियुग्विंशतिश्चैक विंशतिस्तुतथैवच १५।२।२०।२१ वसवोदेवताचा-
स्य वसोःपवित्रेतिमंत्रकं अयुतंजपकुर्वीत छत्रोपानहूदीयते योगिन्यः
पूजयेत्तत्र बलिंताभ्योपिदापयेत् वसवोदेवतास्तत्र शुक्लवर्णाश्चतुर्भुजा
वरदाभयहस्ताश्च साक्षसूत्रांबुजासनाः २३ शतभिषायां भवेद्रोगं प-
वनाख्यायुते ध्रुवं शरीरंक्लेशमाप्नोति शीतमंगेषु दारुणं शून्यंच बाण
वेदाश्च रामाद्वाविंशकं तथा ०।४५।३।२२ वरुणोदेवताचास्य वरु-
णस्तंभमंत्रकं अयुतंजपकुर्वीत दध्योदनहुनेत्ततः सहिरण्यंघृतंद-
द्यात्तैलंचेष्टंचदीयते अजादानंचगोदानं दद्यादेवंसुखीनरः वरुणोदे-
वता तत्र मकरोपरिसंस्थितः यष्टिपाशधरः श्रीमान्गदापद्मधरस्तथा
२४ पूर्वाभाद्रपदेरोगं सर्वगात्रंप्रपीडयेत् सच्छर्दिकृतरोगंचचित्तरो-
गंभवेद्ध्रुवं शून्यंद्वादशश्चैकविंशश्चैकोनविंशति ०।१२।२१।१९ अजैक-
पाद्देवतास्यादहिर्बुध्नेतिमंत्रकं जपंपंचसहस्रंतु क्षीराज्यंशर्करान्वि-
तं श्वेतवस्त्रंहिरण्यंच रुक्महीरंच दीयते अजैकचरणोरुद्रोदेवता-
स्य प्रकीर्तितः खड्गचर्मधरोवाग्मी भुजद्वयसमावृतः २५ उत्तराभाद्रप-
दे रोगं कमलारोगसंभवं ज्वरातीसारतीव्रंच पीडनंभयसंयुतं दिग्यु-
ग्मं नवतिथयो दिनानि मुंचतिज्वरः ०।०।२।९।१५ अहिर्बुध्न्योदेवता-
स्य अहिर्बुध्नेतिमंत्रतः अयुतंचकृतंजाप्यं तिलाज्यंयवहोमयेत्
रौप्यंचतिलदानंच कृष्णवस्त्रंहिरण्यकं अहिर्बुध्याभिधोरुद्रो दे-
वतास्यप्रकीर्तितः श्वेतश्चतुष्करंपद्मबाहुभग्नश्च पाशभृत् २६ रेवत्यां
रोगमुत्पन्नं वातपित्तंतथैवच अष्टादशदशानंदेन्दुसंख्याविंशद्दि-

नानिच१८।१०।१९।२० पूषातुदेवताचास्य पूषेनवव्रतमंत्रकं अयुतंच कृतंजाप्यं तिलतंडुलहोमयेत् फलद्रव्याणिदेयानिरक्तंच वृषभंददे-त् पूषातुदेवतातत्र पद्मवर्णोंबुजासनः द्विभुजःपद्मपाणिःस्यात्पद्मग-र्भप्रियोविभुः २७ मृगेसमुत्थितोव्याधिः कफपूर्वस्तुसंभवेत् नवपंचत-थासप्तदशोक्ताज्वरवासराः ९।५।७।१० चंद्रोहिदेवतातस्य इमं देवेतिमंत्रकं सहस्रंजुहुयात्क्षीरगुडूचीमिश्रितैस्तिलैः छायापात्रं-चदातव्यंमूर्णावासस्तुवापुनः सोमोहिदेवतातस्य श्वेतवर्णःशुभाकृ-तिः दशाश्वरथमारूढःश्वेताश्वोपिनिगद्यते इतिभाहीकष्टावली। ॥ अथबोधायनोक्तातिथिवारयोः कष्टावली॥ प्रतिपदिकष्टंसंदेहः दिनानि१८ अग्निर्देवता अग्निमीळेतिमंत्रजपः हैमीप्रतिमा घृतधूपो दीपश्च यथासंभवं नैवेद्यं घृतं होमद्रव्यं द्वितीयायांदिनानि१६ ब्रह्मादे-वता ब्रह्मयज्ञानमितिपूजामंत्रः अगुरुधूपः घृतदीपः शर्करानैवेद्यं तिलयवाज्यानिहोमद्रव्यं.प्रतिमाहैमी तृतीयायांदिनानि९ गौरिदेवता गौरीमिमायेतिमंत्रः.प्रतिमाहैमीकुंकुमधूपः घृतदीपः द्राक्षाक्षीराज्यं नैवेद्यं पायसंत्रिमध्वक्तं होमद्रव्य चतुर्थ्यां दिनानि१६ गणपतिर्देवता गणानांत्वेतिमंत्रः प्रतिमाहैमी कुंकुमगंधः करवीरादिपुष्पंअगरुधू-पः इक्षुषंडानैवेद्यंहोम्यंच- पंचम्यांदिनानि २१ तारादेवता नमोस्तु सर्पेभ्यइतिमंत्रः हैमी प्रतिमा चंदनगंधःसुरभिपुष्पाणि घृत धूपःपयो नैवेद्यं तिलयवाज्यंहोम्यं षष्ठ्यांदिना.१२ स्कंदोदेवता इप्सस्वस्कंदे-तिमंत्रः पीतंचंदनं रक्तानिपुष्पाणि जटामांसि धूपःफलानिनैवेद्यानि तिलयवाज्यंहोम्यं हैमीप्रतिमासप्तम्यांदिनानि दिननाथोदेवता आ-

कृष्णेनेतिमंत्रः हैमीताम्रीवाप्रतिमा कुंकुमंगंधः करवीरादिपुष्पाणि गुग्गुलुधूपः शर्कराघृतयुतपायसंनैवेद्यं अर्कसमिधः पायसं होमद्रव्यं अष्टम्यांदिनानित्रयोदश ईश्वरोदेवता तमीशानमितिमंत्रः हैमीप्रतिमा कर्पूरंगंधः बिल्वदलानि अर्कपुष्पाणि जटामांसिधूपः पायसं नैवेद्यं त्रिमध्वक्ततिलाहोम्यं नवम्यांदि.१८ दुर्गादेवता जातवेदसइतिमंत्रः रक्तचंदनं कुंकुमादिकं दशम्यांदिनानि२५ यमोदेवता हैमीलोहप्रतिमा यमायत्वेतिमंत्रः मृगमदोगंधः तैलदीपः बिल्वदलानि कृष्णतिलाश्च होम्यं एकादश्यांदिनानि७ विश्वेदेवादेवता विश्वेदेवासइतिमंत्रहैमी प्रतिमा श्वेतचंदनं कृष्णागरुधूपः घृतदीपः तुलसीपत्राणिपूजायां यवमोदकं नैवेद्यं तिलयवमध्वाज्यं होमद्रव्यं द्वादश्यांदिनानि१० रुद्रो देवता यातेरुद्रइतिमंत्रः हैमीप्रतिमा श्रीखंडचंदनं अगरुधूपोघृतदीपः पायसंनैवेद्यं चंपकं पुष्पं तिलयवाज्यमधूनि होम्यं त्रयोदश्यांदिनान्यष्टौ८ शशीदेवता रौक्मीरजतीवा मूर्तिः आप्यायस्वेतिमंत्र श्वेतंचंदनं चंदनधूपं घृतदीपः घृतशर्करा नैवेद्यं तिलयवास्त्रिमध्वक्ताहोम्यं चतुर्दश्यां दिनानि २२ शंभुर्देवता नमः शंभवायेतिमंत्रः रौक्मीवाराजती मूर्तिः श्वेतंचंदनं अर्कपुष्पंबिल्वदलानि अगरुधूपःपायसंनैवेद्यं त्रिमध्वाक्तास्तिला होम्यं अमायांदिनानि१८ शचीदेवता होतायक्षदितिमंत्रः हैमीप्रतिमा कुंकुमादिगंधः नानासुगंधपुष्पाणि कृष्णागुरुधूपः फेणिकानैवेद्यं शर्कराघृतपायसं होम्यं पूर्णिमायांदिनानि१५ चंद्रो देवता मदनकं पूजार्थमन्यत्त्रयोदशीसमं इति तिथिकष्टावलिः ॥ आदित्यस्यरुद्रो देवता दिनानिसप्त सौम्यस्य दिनानि९ सविता देवता गौरी

गौरीमिमायेतिमंत्रःभौमस्य१८ दिनानिस्कंदोदेवता षष्ठीवत् बुधेदिना
नि७विष्णुर्देवताविष्णोरराटमितिमंत्रः गुरौ दिनानि १५ ब्रह्मादेवता शु-
क्रे दिनानि ११ इंद्रोदेवता शनौ दिनानि २ यमो देवता अन्यतिथिस
मं इतिवारकष्टावली ॥ अथैषांशांतिः ॥ यस्मिन्दिवसेज्वरादिपी
डाभवति तत्तिथिवारभदेवतानांप्रतिमानिर्माय शुचिप्रदेशे गोमयोप
लिप्ते तंडुलैश्चतुरस्रमंडलंनिर्माय गणपतिंपूज्य संकल्पंकुर्यात् अमुक
नक्षत्रतिथिवार जव्याधिनिरासार्थं शांतिंकरिष्ये तन्मध्ये तत्तद्देवता
प्रतिमांवक्ष्यमाणगंधादिना समाभ्यर्च कलशं वस्त्रद्वयवेष्टितं तीर्थपूरि-
तं न्यस्य सर्वौषधीः पंचरत्नपंचगव्य सप्तमृत्तिकापंचपल्लवानिच ततो
होमं यथाविधि कृत्वा यजमानाभिषेकंच कृत्वा ताब्राह्मणायदेयाः सा-
धारणविधिः ॥ उक्तंचबौधायनेन ॥ यस्मिन्नृक्षे भवेत्पीडा तन्नक्षत्र-
स्यदेवतां सुवर्णनिर्मितां कृत्वा पूजयेत्प्रयतः शुचिः गोमयेनानुसंलि-
प्य मंडलंच सुलक्षणं चतुरस्रंच संकीर्णं तंडुलैश्च कृताकृतैः कृत्वातु
स्थंडिलं तत्र यत्नतः कृष्णयामृदा तत्पार्श्वेचसुधीः कुर्यात्तंडुलानां
चयंमहत् तत्रप्रमाणं खारीवा द्रोणावा द्वादशस्मृताः अभावेपंच-
वाद्रोणा द्रोणंवातदभावतः ईशानकोणदेशेतु कलशंस्थापयेत्सु-
धीः निधायद्रविणंतत्र कलशे शक्त्यपेक्षया पीठंतु पूर्वतः स्थाप्यं नव्य
वस्त्रेणसंयुतं स्वस्तिकं तंडुलानांच शुभानांचसमालिखेत् तन्मध्ये दे-
वतास्तिस्रो देवतात्रितयस्यवै यस्मिन्नृक्षेभवेद्रोगःतस्यपूर्वापरेसुधीः
उडूनि पूजयेद्यत्ना दधिप्रत्यधिदेवते देवतायस्यऋक्षस्य मंत्रस्त-
ल्लिंगएवच द्रव्यंच तस्ययत्प्रोक्तं प्रभावं प्रकृतिस्तथा तत्सर्वंविदुषा

शे यंहोमंतत्रप्रकल्पयेत् पंचोपचारसंयुक्तांपूजांतत्रप्रकल्पयेत् स्व
गृह्योक्तविधानेन कुर्यादग्निमुखंसुधीः कलशंजलपूर्णंचवस्त्रयुग्मेनवे-
ष्टयेत् निधायचौषधीस्तत्रपंचपल्लवसंयुताः समस्थानमृदःकुंभेआल
वालंप्रपूरयेत् इमंमेवरुण इत्येवं जलमंत्रेणवापुनः सर्वेसमुद्राःस-
रितइतिमंत्रेणमंत्रयेत्यच्चिद्धितेयशोय धेत्यादिसूक्तंजपेत्पुनः
आवाहयेदघटेदेवं वरुणंपयसांपतिं एवंनक्षत्रशांत्यर्थे विदध्यात्पू
र्वपीठिकां सामान्योयंविधिःप्रोक्तोनक्षत्राणांप्रपूजने सर्वौषधीना-
मप्राप्तौभवेदेका शतावरी सर्वेषामपिगंधानामभावेचंदनंमतं श-
तपत्रंसुमनसां धूपाभावेचगुग्गुलुः नैवेद्यानामभावेतुपायसंसघृतं
स्मृतं मंत्राणामप्यभावेतुगायत्री मंत्रउत्तमः होमद्रव्यस्यदुःप्राप्तौ
तिलाप्रोक्तामनीषिभिः अष्टोत्तरसहस्रंच तथाशतमुदाहृतं॥ मदन
रत्नेऽपिस्तु ॥ अखिलभेषुगायत्र्यायमोदशेहोमोष्टोत्तरशतसंख्याकः
बलिश्चतत्रनक्षत्रदेवतायै सोपिहोमावशिष्टद्रव्येणैदकचिदन्येन
अथजन्मसंबंधिषुनक्षत्रराशिलग्नेषु यमघंटेनैधनेप्रत्यरौत्रअष्टमचंद्र
रोगोत्सतौ मृत्युः रविमघाद्वादशीगुरुशतभिषक्षष्ठीशुक्राश्विन्यष्ट
मीशनौ पूर्वाषाढानवमीनांयोगेव्याधौमृत्युः भरण्यनुराधेरवौआर्द्रो
तराषाढे सोमेमघाशतभिषावाभौमे अश्विनीविशाखवाबुधे ज्येष्ठामृ-
गेगुरौ श्रवणाश्लेषाभृगौ पूर्वाभाद्रपदाहस्ते वाशनौ अत्रापिरोगे
महाकष्टं अत्रशांतिः पुष्कलाविधेया अथजननलग्नफलानि ॥ श्या-
मवर्णोभवेन्मेषे सिंदूरारुणनेत्रयोः बाल्येशिरोदीर्घकांतिःप्रकृत्याश्ले
ष्मकोनरः पूर्वशिरोभवेन्मातुर्जायापंचचतुस्त्रयः रक्तांबरधरोवासो

पूर्वमधुरभोजनं ॥ अथवृषस्य वृषलग्ने भवेद्वालो गौरवर्ण सुकांतिकः रक्तपित्तविकारेण वनितातित्रः पंचवा पश्चिमेचसुखे मातुर्भोजनंशाकर्जकृतं शुक्लांबरधरोवासो जननीरौप्यभूषण मिथुनस्य नेत्ररोगी नरो युग्मे पित्तवर्णोहिजायते वनितापंचत्रयंचैव प्रसूत्याश्चोत्तरेशिरः अल्पदुग्धवती माता पित्तपीडादि कारकः लक्षणंदक्षिणस्यागे भोजनं लवणंपुरा जीर्णवस्त्रंभवेन्मातुर्जानीहिलक्षणंपुरा ॥ अथकर्कटस्यं भोजनं वातलंकर्के चतुस्थानेचमध्यमंपूर्वाभिमुखाचजननी जायातत्रचतुस्त्रयः वातश्लेष्मविकारेण मातापितृरुगार्तिदा पूर्वाल्पभोजनं कर्के वासांसिफलितानिच गौरवर्णोभवेद्बालोदीर्घप्राणः सुकोमलः सौवर्णभूषणंहस्तेकर्कलग्नप्रभावतः ॥ अथसिंहस्य ॥ बहुकेशोभवेत्सिंहेदीर्घप्राणः सुलोचनः मातुस्तनौरक्तवस्त्रं भूषाकृतकहस्तयोः दक्षिणाभिमुखंमातुस्त्रियः पंचाथवारसाः तांबूलभक्षणंमातुः चिन्हंपृष्टस्थबालके अथकन्यायाः कन्यालग्ने नरोजातोगोरवर्णोतिसुंदरः वनितासुस्थितापंच जंघयोश्चिन्हमेवहि जनन्याश्चोत्तरेशीर्षं कंठेचिन्हंतुबालके गृहस्थितोनहिपिता प्रवालाभरणंतनौ जननीरक्तवस्त्राच कन्यायांजायतेपुमान् ॥ अथतुलायाः७ गौरवर्णः तुलालग्नेनेत्ररोगीप्रजायते रक्तविस्फोटकोदेहे प्राच्यांशीर्षं प्रजायते चतस्त्रोवनितास्तत्र कुमारीचसमीपतः मातातत्रतनौपीडा संजातस्तत्रलक्षणः अल्पाभरणंहस्ते जीर्णवस्त्रसमन्वितः जननी शीतलंवारि पीताजानीहिलक्षणं ॥ अथवृश्चिकस्य वृश्चिकेजायते बालोदीर्घकेशः सुलोमशः स्वमंगेभूषणेमातुस्त्रियस्तिसृचतसृवा

ज्ञे यंद्धोमंतत्रप्रकल्पयेत् पंचोपचारसंयुक्तां पूजांतत्रप्रकल्पयेत् स्व
गृह्योक्तविधानेनकुर्यादग्निमुखंसुधीः कलशंजलपूर्णंचवस्त्रयुग्मेनवे-
ष्टयेत् निधायचौषधीस्तत्रपंचपल्लवसंयुताः सप्तस्थानमृदःकुंभेआल
वालंप्रपूरयेत् इमंमेवरुण इत्येवं जलमंत्रेणवापुनः सर्वेसमुद्राःस-
रितइतिमंत्रेणमंत्रयेत्यच्चिद्धितेयशोय थेत्यादिसूक्तंजपेत्पुनः
आवाहयेदघटेदेवं वरुणंप यसांपतिं एवंनक्षत्रशांत्यर्थे विदध्यात्पू-
र्व पीठिकां सामान्योयंविधिःप्रोक्तोनक्षत्राणांप्रपूजने सर्वौषधीना-
मप्राप्तौभवेदेका शतावरी सर्वेषामपिगंधानामभावेचंदनंमतं श-
तपत्रंसुमनसां धूपाभावेचगुग्गुलुः नैवेद्यानामभावेतुपायसंसघृतं
स्मृतं मंत्राणामप्यभावेतुगायत्री मंत्रउत्तमः होमद्रव्यस्यदुःप्रासौ
तिलाप्रोक्तामनीषिभिः अष्टोत्तरसहस्रंच तथाशतमुदाहृतं ॥ मदन
रत्नेऽपिस्तु ॥ अखिलभेषुगायत्र्यायमोदशेहोमोष्टोत्तरशतसंख्याकः
बलिश्चतत्रनक्षत्रदेवतायैसोपिहोमावशिष्टद्रव्येणैवकचिदन्येन
अथजन्मसंबंधिषुनक्षत्रराशिलग्नेषुयमघंटेनैधनेप्रत्यरोअष्टमचंद्रे
रोगोत्पत्तौमृत्युः रविमघाद्वादशीगुरुशतभिषक्षष्ठीशुक्राश्विन्यष्ट
मीशनौपूर्वाषाढानवमीनांयोगेव्याधौमृत्युः भरण्यनुराधेरवौआर्द्रो
त्तराषाढेसोमेमघाशतभिषावाभौमे अश्विनीविशाखाबुधेज्येष्ठामृ-
गेगुरौश्रवणाश्लेषाभृगौ पूर्वाभाद्रपदाहस्ते वाशनौ अत्रापिरोगे
महाकष्टं अत्रशांतिः पुष्कलाविधेया अथजननलग्नफलानि ॥ श्या-
मवर्णोभवेन्मेषे सिंदूरारुणनेत्रयोः बाल्येशिरोदीर्घकांतिःप्रकृत्याश्ले
ष्मकोनरः पूर्वहिंसोभवन्मानुर्जायापंचचतुष्टयः रक्तांबरधरोवासो

